[illegible]॥ ०॥श्री॥ शिरोमणिटीका भवानंदीया॥० [illegible]॥० श्री श्री भवन भवतु॥० [illegible]॥

गणेशायनमः॥ श्रीरस्तु॥ श्रीगोविंदपदांभोजनखचंद्रमरीचयः। संचारयंतु स्वांतमस्यांधे मम संत
तमं वनं॥१॥ नमस्कृत्य गुरून् सारं विगूढं मामि(?)द्धिधितौ॥ श्रीभवानंदसिद्धांतबोधोशेन प्रकाश्यते॥२॥
ॐ नमः इति॥ परमात्मने सर्वात्मने नमः॥ उत्कृष्टः जगतः सृष्टिस्थितिप्रलयकर्त्रे तस्मै
कृते तस्य कथं सृष्ट्यादि विचित्रकार्यकारित्वं हेतुमात्रं हि ॐ इति॥ ब्रह्मविष्णुशिवात्मकाय परमार्थः॥ तरं॥
ॐकारघटकैरकारोकारमकारैर्ब्रह्मादीनां प्रतिपादनात्॥ तस्य च नमस्कार्यता प्रयोजकं रूपां
तरमपि दर्शयति। सर्वेति॥ सर्वभूतानि सर्वप्राणिनः विष्टेभ्यः अंतर्यामितया स्वस्वकार्ये नि
योजयन् परितिष्ठते अंतर्यामिनो भगवतः प्रेरणयैव सर्वप्राणिनां स्वस्वकार्ये प्रवृत्तिरिति भावः॥
विभुः धारणात्मकसंयोगविशेषः भूतपदं मूर्त्तपरं अत एव विश्वव्यापी विश्वशक्तिः पिनाकीय
त्र विश्वशब्दो यावन्मूर्त्तवचन इत्याचार्याः प्रयत्नवदीश्वरसंयोगस्यैव ब्रह्मांडादिपतन प्र
तिबंधकत्वात् एव द्यौर्वा पृथिवी विधृते तिष्ठत इति श्रुतिरपि भगवत्संयोगस्य धारकत्व
माहेश्वापि नदंति॥ यत्तु आकाशं नेश्वरादतिरिच्यते इति मतानुसारेणेदमिति॥ तन्न॥ ईश्वरस्यै
वाकाशत्वे भूतपद वाच्यत्वेन तत्रैव तत्प्रतियोगिकसंयोगाभावात्॥ अखंडो नित्यो आनंदबो
धो यस्य तस्मै इत्यर्थः॥ नित्यं विज्ञानमानंदं ब्रह्मेति श्रुतिः ब्रह्म स्वरूपावधारणापरा आनंदवि २॥

शास्य । नृसत्वं प्रतिपादयंती विशेषणस्यानंदस्यापि नित्यत्वं प्रतिपादयति ॥ तथा च श्रुतिवचनात् सि
द्धो नित्यसुखे सुखत्वावांतरजातिरेव पुण्यजन्यतावच्छेदकत्वेन कल्प्यत इत्याशयः ॥ अखंडो दुःखासं
भिन्नो ज्ञानंदो यस्मादेवंभूतो पासनात्मक बोधो यस्येति वार्थः । यस्येति षष्ठ्यर्थो विषयिता । सूर्यायो
पूर्ति इतिध्याय । ननु संगतिप्रदर्शनानुमाननिरूपणप्रतिज्ञयोः प्रयोजनाभावात् असंगताभिधान
स्यैवमुन्मत्तप्रलपितत्वादिति शंकां निरासप्रयोजनवत्वादत आह ॥ पूर्वापरेति ॥ संगतिप्रदर्श
नस्य फलमेकवाक्यताप्रतिपत्तिः । अनुमाननिरूपणप्रतिज्ञायाः फलं शिष्यावधानमित्यर्थः ॥
प्रयोजनवत्वमवधार्य प्रथमग्रंथे प्रवृत्तानां तदेकवाक्यताज्ञानेनैवोत्तरग्रंथेऽपि तत्प्रयोज
नवत्ताज्ञानेन प्रवृत्तिसंभवादिति भावः ॥ तत्र वार्थैक्यादेकं वाक्यं साकांक्षं चेत् ॥ विभागे
स्यादिति जैमिनीयसूत्रं तत्राचार्थैक्यादित्येतावता तन्मात्रे कृते भगोवां विभजतु पृष्ठावां विभ
क्तिसेन यो विभागस्य साक्षैक्यादितिव्याप्तिरतः साकांक्षं चेदिति विभागे विच्छिद्य पठने श्रोतुर्यदि
परस्परान्वयविषयिण्योकांक्षा भवति ॥ यथा घटमानयेत्यत्र घटमित्युक्ते आनयेत्यनुक्ते श्रो
तुः पदस्य वेत्याकांक्षा शब्दमानयेत्येतावन्मात्रे च किं घटं वेति श्रोतुराकांक्षा भगोवां विभज्य निरा
विच्छेदेतु नैवमाकांक्षेति तत्प्रयुक्तासः तावन्मात्रं च स्यान्नंते सद्गदनं हतो मिद्धतस्यधारयासु शेवंक

यमिर्लंत। स्मिन्नसीदाम्ते प्रतितिष्ठन्त्री हीणां मेदं सुमनस्यमान इति अत्र कल्प यामीयंत सद
...र्थिको मंत्रः तस्मिन्नित्यादि सादनार्थः एकः मंत्रः एतयो विभागे साकांक्षत्व मस्ति कल्प यामीयं
तस्यानिच्छेदेक स्मिन्नु न्नित्याकांक्षाभावनितो ऽर्थैक्यादिति। तत्र सदन सादन योरर्थयो र्भेदादि टि॥
ति भावः। अर्थैक्यं च न वाक्यार्थैक्यं प्रति प्रकारूपं वाक्यार्थानां भेदात्॥ किंतु तात्पर्यविषयैक्यं प्रष्टे
तेन प्रमाणात तत्व मेव च तुर्णां ग्रंथानां तात्पर्य विषयः॥ कारणाकथनानंतरं कार्यस्याकथने कि
मस्य कार्यमित्याकांक्षा चेति। न च विभिन्नतात्पर्यकेपि प्रसंगादि संगति सत्वात् संगतिर्नतादृशैक टी॥
वाक्यताव्याप्येति कथं तयेकवाक्यताप्रतिपत्तिरितिवाच्यं एकवाक्यतापन्नयोरेव संगतिव्यवहारे प्रसंगादि
संगत्यैकवाक्यताया अनुप्रवेशाद्विभिन्नतात्पर्यके संगत्यभावादिति। अकारांत प्रत्यक्षपदस्य मूलेसत्वा
त् प्रत्यक्षेति पाठ निर्देशो अनुचित इत्याशयेनाह॥ प्रत्यक्षवितीति॥ प्रत्यक्षप्रमित्यनंतरं अनुमि मे॥
त निरूपणे प्रत्यक्ष प्रमाणानंतरं च अनुमान निरूपणे संगते राकांक्षितत्वात् [illegible] दर्शनपरत्व
मूलस्याह॥ अत्रोपजीव्योपजीव्योपजीवकभाव इति अथ प्रत्यक्षानुमानयोरनंतरं च फलयोरेवा...नि
रूपणात् फलतत इति प्रथममनुपपन्यतां किंतु फलस्वरूपयोः फलयोश्च कार्यकारणभावो ऽपि स्वरूप
योः संगतिर्जिज्ञासोपयोगिता दिशा हुः उपजीवकत्वं संगतिः। सा चानंतराभिधानव्याप्या अत एवो २॥
पजीवकत्वादनंतरं निरूपणं इत्येतदिति प्राचां मतं मनुस्त्यात्॥ प्रत्यक्षफलस्येति॥ अनुमिते

उपादानप्रत्यक्षविषयत्वात् स्यादयं तः॥ न करणतेति अनुमितिफलोपहितकरणतानिर्वाहकप्रत्यासत्ति
विरहे विषयज्ञानत्वेन जनकतापन्नसामानाधिकरण्यप्रत्यासत्तिरस्ति ईश्वरीयव्याप्तिज्ञाने मास्मदादि स्व
जन्यपरामर्शसत्त्वेऽपि करणस्य व्यापारसंबंधेनैव फलोपधायकत्वात्॥ विशेषणज्ञानत्वेन जनकतायां
च सामानाधिकरण्यप्रत्यासत्तिविरहेण ईश्वरीयव्याप्तिज्ञानेनास्मदादिपरामर्श फलोपहितत्व
शाचनात् स्वजन्यपरामर्शात्मक प्रत्यासत्तिविरहेण ईश्वरज्ञानस्यास्मदाद्यनुमितिकरणता जन्य
निरूपस्य स्वरूपयोग्यत्वे फलावश्यंभावापत्ते जन्यव्याप्तिज्ञानत्वेनैवानुमितिकरणतावच्छेद
कतया इतरेण प्रत्यासत्तिविरहेऽपीश्वरप्रत्यक्ष इत्यादेः करणत्वात्॥ प्रत्यासत्त्यभावेन करणताभावे
साधक इति प्रकृते सामान्यतो ऽभिधानात्॥ यत्तु ईश्वरीयव्याप्तिज्ञानमपि स्वजन्यव्यापार
संबंधेनानुमितिफलोपहितं भवत्येव॥ कार्यमात्रोपधायकस्य फलानुकूलव्यापारात्मकपराम
र्शोपधायकत्वादिति तन्न॥ एवं सति व्यधिकरणव्याप्तिज्ञानस्यापि कालोपाधिविधया परा
मर्शोपधायकत्वेन व्यधिकरणानुमिति॥ फलोपहितकरणत्वप्रसंगेन विशेषणज्ञानत्वेन स्व
जन्यपरामर्शस्यैव तत्प्रत्यासत्तितया ईश्वरव्याप्तिज्ञानस्यानुमितिफलोपहितकरणत्वस्यासं
भवात्॥ न च येन केनापि स्वरूपेण फलोपहितत्वेपि नित्यस्येश्वरादिव्यापारे न वा वेति वाच्यं॥ स्व
रूपयोग्यताघटकसंबंधेन फलोपधानस्य तत्र व्याप्तोनिवेशात्॥ अन्यथा कपालादेर्द्रव्यत्वेन
घटजनकत्वे थाकाशादेः संयोगादिसंबंधेन घटात्मकफलसंबंधसंभवात्॥ सुतरां

नस्यैव निष्प्रयोजनकत्वापातात्॥ फलयोगव्यवच्छिन्नकारणत्वं करणत्वं तादृशमनुमितिकरणं च परा
मर्शः तस्य करणतायां च सामानाधिकरण्यं प्रत्यासत्तिः फलोपहितकरणमेव निरूप्यं अत एव वक्ष्यति
फलोपहितस्य लक्ष्यत्वायेति तथा च ईश्वरज्ञानस्य फलसामानाधिकरण्यविरहेण तादृशफलोपहित
करणत्वाभावादिति भावः॥ इति केचित् अनुमितिकरणतावच्छेदेन प्रत्यक्षोपजीवकत्वं व्यवच्छेद्यप्रत्यक्षके
रणतावच्छेदेनानुमानोपजीवकत्वस्य व्यतिरेकमाह सर्वं पुनरिति॥ ननु व्याप्तिज्ञानत्वेनैवानुमितिकर
णताः न स्यादिन्द्रियस्यादृष्टादिरूपसहकारिविरहेण फलव्यतिरेकसंभवात्॥ निःसस्येति व्याप्तेरप्र
योजकत्वादेतदाह॥ दृष्टद्वारेति॥ तथा च करणतावच्छेदकधर्मसामानाधिकरण्येन स्वजनकादृष्टाज टी॥
श्री॥ नकेन्द्रियजन्यत्वमेवानुमाने स्वानन्तर्याभिधाननियामकमिति भावः॥ इन्द्रियसामानाधिकरण्येन स्व
प जनकादृष्टाजनकानुमाजेने भ्रमं॥ नास्तीत्याह॥ न चोत्पत्तिमदृदयीति॥ अविनाकरणतावच्छेदक
धर्मसामानाधिकरण्यं सूचितं॥ ननु [illegible] पूर्वोपेन पूर्वं च क्षुधानिवाननन्तरं च क्षुरन्तरो देव मोपध
धानानन्तरं प्रत्यक्षं च क्षुरुत्पादयतीति वाच्यं॥ तेन चर्पणाजनकानुमानस्योपधानजनकानुमानस्य भ॥
जनयोजनकत्वेन जनकत्वाभावात्॥ न चैवं अदृष्टद्वारकत्वमिति व्यर्थं अदृष्टद्वारकानुमानस्येन्द्रिय
जनकत्वाभावादिति वाच्यं॥ ईश्वरज्ञानस्यापि [illegible] अनुमितिकरणतात्वात्तद्वारयायैव तदु
पादानादिति॥ अदृष्टद्वारकोपजीवकत्वस्योभयत्र सत्त्वान्न विनिगमकत्वमिति भावः॥ न नियम इति
तथा चोपजीवकत्वादिति हेतुर्यं च म्यनुपपन्नेति भावः॥ कश्चित्तु कार्यनिरूप्यापीति॥ यथाजेवानुमिति ४॥
४॥ निरूप्यपानन्तरं तत्करणं निरूप्यमिति भावः॥ तत्ज्ञानजन्यलिङ्गे सांप्रयोज्यत्वं पञ्चम्यर्थो न तु तत्

ज्ञान...त्यस्य इत्याशयेनाह ॥ किंचान इति ॥ तादृशनियमाभावे किमनिष्टमित्यर्थः नन्वनंतराभिधाना
व्याप्यत्वेतस्य संगतित्वमनुपपन्नं अनंतराभिधानव्याप्यत्वस्यैव तत्तद्घटकत्वादेत आह न हीति संगति
...पर्यालोचनेनैतस्या अनंतराभिधानव्याप्यत्वस्यैव तत्तद्घटैः दर्शयितुं तद्घटकमाह ॥ आनंत
र्य इति ॥ आनंतर्याभिधाने प्रयोजिकाया जिज्ञासा तज्जनकं यत् ज्ञानं तद्विषय इत्यर्थः ॥ जिज्ञासाजा
नकज्ञानविषये घटकत्वावृत्तिव्याप्तिवारणाय प्रयोजकांतं प्रत्यक्षस्य कारणत्वज्ञाने कारणस्य कार्य
मावश्यकमिति क्रमेण कार्यत्वरूपेण कार्यसामान्यज्ञानं ततः सामान्यधर्मप्रकारकज्ञानस्य वि
शेषधर्मप्रकारकजिज्ञासाजनकत्वात् किमस्य कार्यमित्याकारिका शिष्यजिज्ञासा ततः शिष्यस्य
किमस्य कार्यमिति शब्दप्रयोगः ॥ ततः शिष्ये जिज्ञासाज्ञानं ..., ततः शिष्यज्ञानगोचरे ... इष्ट
साधनताज्ञानेनानंतराभिधानमिति क्रमेण जिज्ञासाया अनंतराभिधानप्रयोजकत्वेन वक्ष्य
माणोच्चरेच्छा जिज्ञासा तत्र ज्ञाने इष्टसाधनताज्ञानं हेतुरिति तद्विषये इष्टसाधनत्वेति व्याप्तिरि
ति वाच्यं ॥ तादृशजिज्ञासा प्रति समानविशेष्यकत्व प्रत्यासत्त्या नवच्छिन्नायाजनकताते दृवच्छेदकं य
त् प्रकारकज्ञानत्वेन कार्यत्वावान्तरधर्मप्रकारकज्ञानत्वेऽव्यवच्छेदयात् ॥ अजिज्ञासात्ववच्छिन्नं प्र
ति हेतुतायां । कार्यत्वेन वस्तुगत्या घटज्ञानेपि कार्यत्वावान्तरधर्मप्रकारकस्यान एवेदोदयात् ॥ अ
...च्छेदकत्वं च तस्य व्याप्याधिकरणत्वं ॥ तेन कार्यत्वघटकैकदेशनिरासः ॥ ... भाये वचार्थयिदं

प्रकारेण्याद्यभिधानाच्चे॥ न कार्याद्यभिधानादि भविष्यति व्याप्तिरिति॥ यत्तु तादृशजिज्ञासात्वव्याप्यधर्मावच्छिन्न
कार्यताप्रतियोगिककारणताया यत्प्रकारकज्ञानत्वमवच्छेदकं तत्त्वमर्थः। उपायेच्छात्वावच्छिन्नं प्रत्येवेष्ट
साधनत्वज्ञानस्य हेतुत्वादुपायेच्छात्वस्य घटेच्छादिसाधारण्येन तादृशजिज्ञासात्वव्याप्यत्वाभावादिति
तन्न॥ कार्यतावान्तरधर्मप्रकारकजिज्ञासात्वादीनामानन्तर्याभिधानप्रयोजकजिज्ञासात्वव्याप्यत्वात् ता
दृशकार्यकारणभावमादाय प्रवृत्तेर्लक्षणगमनासंभवात्॥ तथाहि तावच्छिन्नकार्यताप्रतियो
गिककारणतायां च तथ्य ज्ञानत्वस्यैवावच्छेदकत्वे तथाकार्यत्वे प्रकारकज्ञानत्वस्यानवच्छेदकत्वात् तथा
चेष्टसाधनत्वं कार्यकारणभावात्मकतया संगतिरेवेति तत्रातिव्याप्तिर्न दोषायेति॥ तन्न॥ प्रत्य
क्षानुमानयोः कार्यकारणभावो हि तयोः संगतिर्न तु इष्टसाधनयोः तथा च यदनन्तरं यदभिधा
ने प्रयोजकजिज्ञासाजनकज्ञानविषयो यः स तयोः संगतिः। एवंरूपे प्रत्यक्षानुमानसंगति
लक्षणे इष्टसाधनत्वेऽतिव्याप्तेरपरिहारात्॥ यद्धर्मावान्तरधर्मप्रकारकज्ञानेष्टसाधनताज्ञा
नं आनन्तर्याभिधानप्रयोजकजिज्ञासाजनकं स धर्मः संगतिरतः॥ सामान्यधर्मप्रकारक
ज्ञानस्य सत्वात् येषां विशेषधर्मप्रकारकजिज्ञासां प्रति जनकत्वाभावेपि न क्षतिः॥ न वा इ
ष्टसाधनत्वेऽतिव्याप्तिरिति केचित्॥ अत्रेदं वदन्ति॥ गेहे घटोस्तीति सन्निधानानन्तरं घटत्वसामान्यज्ञानात्॥
को घट इति जिज्ञासायां कंबुग्रीवादिमान् घट इति अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञा॥ विष

-घटत्वे ऽतिव्याप्तिरेवं आधारज्ञानानंतरं आधेयत्वसामान्यज्ञानात् किमस्याधेयमिति जिज्ञासा तथा ऽधेयस्या-
नंतरमभिधानात् आधेयता घटवपि इति अत्र कुमगो हेतुघटो ऽस्तीत्यादौ घटत्वादिकं संगतिरेव उपोद्घातात्तन्नि-
वेशात् ॥ तथा च चिंताप्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः ॥ अनेन प्रकृतसिद्ध्यनुकूलचिंता कालावच्छिन्नं प्र-
कृतार्थानुकूलत्वमुपोद्घातः प्रकृतं च तत्र तत्र विशिष्योपादेयं अनुकूलत्वं च क्वचिद् घटकत्वं क्वचित् ज्ञापकत्व-
मित्यादिक्रमेणावबोद्धव्यं घटकत्वं यथा व्याप्तिविशिष्टपक्षधर्मताज्ञानेजन्यं ज्ञानमित्यत्र ज्ञातव्यं ज्ञातव्या-
प्यकस्य व्याप्तिपदवाच्यत्वेन ज्ञाने का व्याप्तिरित्याकारिकायां जिज्ञासायां व्याप्तिनिरूपणं एवमि-
ंद्रियासन्निकृष्टपर्वतीयधूमे व्याप्तिविशिष्टत्वधीनं तदुपस्थापकं किं नेति तदुपस्थापकं किमित्या-
कांक्षायां सामान्यलक्षणानिरूपणं तु एवं व्याप्तिविशिष्टपक्षधर्मताज्ञानस्यानुमितिहेतुत्वे किं ज्ञापकं
इत्याकांक्षायां परामर्शस्यानुमितिहेतुताव्यवस्थापनमिति तत्र ॥ तत्रोपोद्घातपदप्रयोगः प्रकृते
॥ ज्ञातघटपदार्थस्य घटोऽस्तीत्यत्र घटपदवाच्यत्वेन ज्ञाने को घटपदवाच्य इति जिज्ञासायां
कंबुग्रीवादिमानिति निरूपणे प्रकृतेऽपि यत्तिलसिद्ध्यनुकूलचिंताकालीनस्य घटपदशक्तिघटकत्वस्य स-
त्वेनोपोद्घातत्वसंभवात् ॥ एवं आधारत्वादिकमपि प्रसंगमध्ये निविशते आधारप्रसंगेन स्मृतस्या-
धेयस्यानुपेक्षणीयत्वज्ञानेन जिज्ञासोदयात् ॥ केचित्तु घटोऽस्तीत्यादौ घटपदवाच्यत्वं आधेयता-
कं च न संगतं ॥ अनुपेक्षणीयत्वं हि उपेक्षानर्हत्वावच्छेदकधर्मवत्वं स च धर्मो घटपदवाच्य

धारत्वादिकं च प्रसंगत एव॥ अनुपेक्षणीयत्वं उक्तरूपेणैवानुगमात्ताधिक्यमित्याहुः॥ तत्र स्मृतिका
रणावच्छेदेनोपेक्षानर्हत्वं॥ प्रसंग॥ तत्र स्मृतिप्रतिकावच्छेदः॥ स्वरूपतो नितरां॥ ज्ञातोप
योगी स्मृतिरनुपेक्षणीयत्वान्यथासिद्धत्वात् रेव स्वयं स्मृतायां जिज्ञासानुदयात्॥ स्वीयानुपेक्षणी
यत्वज्ञानस्य जिज्ञासाजनकत्वाभावाच्च केचित्तु॥ श्रोतुरेव स्मृतिरनुपेक्षणीयत्वेन वक्तुर्यस्मिन्नुपे
क्षणीयत्वज्ञानस्य जिज्ञासाजनकत्वाभावाच्च॥ केचित्तु॥ श्रोतुरेव स्मृतिरनुपेक्षणीयत्वं च वक्तुर्य
स्मिन्नुपेक्षेव कतरूपेक्षा न भविष्यतीति संध्याय श्रोतुर्जिज्ञासोदयात्॥ दित्याहुः॥ एवं प्रकृतसिद्ध्य
नुकूलचिंताकालावच्छेदेन प्रकृतानुकूलत्वमुपोद्घातः॥ चिंतां च वक्ष्यमाणस्यापि तादृशकाला
वच्छेदः॥ स्वरूपसन्निवेशो द्घातपदनियामक इतरांशस्य ज्ञातोपयोगी एवं प्रतिबंधकीभूतजि
ज्ञासानिवृत्तौ अवश्यवक्तव्यत्वमवसरः अत्र निवर्त्यांशः॥ स्वरूपसन्नितरांश एव ज्ञातो
पयोगी यथानुमाननिरूपणानंतरं तादृशजिज्ञासानिवृत्तौ वक्तव्यत्वज्ञानात्॥ किं वक्तव्यमि
ति श्रोतुर्जिज्ञासानंतरं उपमाननिरूपणमिति जिज्ञासितान्ते सिद्धत्वमवसर इति केचि
त्॥ तस्यापि पूर्वोक्तरूपपर्यवसानं भवति हि जिज्ञासाविषयसिद्धत्वे इत्याहुः मन्यतु॥ किं वक्त
व्यमिति जिज्ञासेति निर्वाहकत्वमेककार्यनिर्वाहकत्वं तच्च प्रयोजकत्वं कारणतावच्छेदकसा
धारणं यथा व्याप्तिपक्षधर्मतयोरनुमितिजनकत्वेपि न ज्ञानकीभूतज्ञानविषयतावच्छेदक
त्वेनैककार्यानुकूलत्वं॥ तत्र सामान्यतोऽनुमितित्वावच्छिन्नैककार्यानुकूलत्वज्ञाने कितरदनुक

उत्वज्ञाने किं तदनुक[illegible] [illegible] ज्ञासायामनंतरं [illegible] पलतानिरूपणमिति। [illegible] ककार्यत्वं [illegible]
ताप्रयोज्यता सा च जन्यता जन्[illegible] ज्ञानविषयता न यथा ईश्वरशक्यो रतु मानो जन्यापि तदुक्त [illegible]
पत्वे लक्षणे [illegible] कार्यत्वसंगत्या ईश्वरवादानंतरं मीमांसके ति नवा किं तदशंक्यितानित्यामिके [illegible]
सिध्यर्थमनंतरं [illegible] किं निरस्य परम प्रयोजनं तदनुमानस्यापवर्ग इत्यनेन ईश्वरसिद्ध्य
र्था रनुमानजन्यत्वलक्षणेककार्य [illegible] संगतिः स्वविततासामान्यतो [illegible] ककार्यत्वज्ञाने [illegible]
[illegible] मिति तज्जिज्ञासायां विशिष्य कार्यतिरोभिधानेन सामान्यलक्षणासंभवात्। [illegible]
[illegible] पपादकत्वमिति। तत्र। उपपादकत्वं न ज्ञापकत्वं च घटकत्वं [illegible] उपोद्घातेन [illegible]
[illegible] ज्ञायागतार्थत्वात्। एवं सर्वत्रोहनीयं॥ अत्र च विभिन्नतासर्वकं संगतिः [illegible]
वादे [illegible] सामान्यलक्षणे विशेषलक्षणे च देयं अत्र च तासर्वे [illegible] जिज्ञासा [illegible]
स्यात्प्रसंगात्। फलोपधानस्य च सर्वत्रासंभवात्। प्रसंगाद्यन्यतमत्वं तत्त्वमिति [illegible]
[illegible] वैति। कार्य्ये ज्ञाते कार्यसकारणमिति शैलाकारेदूरूढतेति [illegible] निरूपणीयं [illegible]
[illegible] गमस्य स्वयमप्यूहेपितु [illegible] वाक्यवादितित्याचेन सुगम [illegible]
[illegible] संभवत्येव इत्यत आह। औत्सर्गिकी मिति। न तु प्रतिबंधकीभूतायां [illegible]
रीतिः प्रति [illegible] रूपसतीति [illegible] तु [illegible]

करे पञ्चमत्वबोधादौ प्रतिबंधकजिज्ञासानिवृत्तौ सत्यां वक्तव्यत्वमवसरः। वक्तव्यत्वज्ञानादेव जिज्ञा
सितेति न लक्षणाव्याप्तिः। अतएव ग्रंथविशेषेण सरसंगतिसूचनाय प्राक् मितिशब्दस्य विरम्यत इति शब्दस्य
चाउपनिबंधः॥ शब्दांतरेति॥ उपमितिविषयीभूतगवयपदातिरिक्तगोसदृशोपदादिशक्तिग्राहके
तिस्यर्थः। शब्दांतरसमयग्राहकके वलमतिति देशवाक्यार्थस्मृतिरूपव्यापारमात्रोपधीने उप
सं॰ टी॰॥ योगिन उपमितौ तत्र गोसादृश्यादीनामविषयत्वात् अउपमितिविषयीभूतगवयपदप्रवृत्ति
निमित्तबोधकमनुमानमुपजीव्यत्वेन दर्शयति॥ सप्रवृत्तीति॥ समानवित्तिवेद्यतयागवयप
दप्रवृत्तिनिमित्तविषयकं गवयपदं सप्रवृत्तिनिमित्तस्य विशेषयतया तत्ग्राहकस्यानुमान
स्योपजीव्यत्वादिति भावः॥ इदं च चिंतामणिकारमते आचार्यमते तु गवयो गवयपदवाच्य इत्येवो भ॰॥
पमितिस्वीकारादिति ध्येयं अत्रोपमितावयं क्रमः। अगृहीतगव यपदशक्तिकस्य कीदृशो गव
यपदवाच्य इति प्रश्नानंतरं गोसदृशो गवयपदवाच्य इत्याकारकमतिदेशवाक्यार्थज्ञानं
ततः सादृश्यविशिष्टपिंडस्य दर्शनं तदेव करणं ततो ऽतिदेशवाक्यार्थस्मृतिः॥ सैव च व्यापार
तथा चायं गवयपदवाच्य इत्युपमितिरिति॥ नन्वेतावता उपमितिं प्रत्येवोपजीव्यत्वमादर्शिति
नतूपमानस्वरूपं प्रस्तपीत्यत आह॥ अंतत इति॥ उपमितिकरणस्यापि कार्यत्वेना दृष्टज
७॥ न्यत्वात् दृष्टजनकप्रत्यक्षस्यैवायिकोनुमानसापेक्षमेवोपमानमेत्यर्थः। अयं गवयपदवाच्य
गवयवान् गवयसंयोगादित्यनुमानव्यक्तिविशेषस्यापि गवयो गवयपदवाच्य इत्युपमानोप

जीव्यत्वादाद्॥ निखिलामेचेति॥ तत्रानुमानत्वावच्छेदननोपजीवकतेति न दोषः॥ केचित्तु सस्वर
सनीजंबुबहुवादिसंमतत्वादिति मूलेन तादृशसंगतेरप्रदर्शनाद्ग्रंथसंदर्भः॥ ननु संगतेरनि
यामकत्वेऽनंतराभिधाने किं नियामकमत आह॥ संभवति चेति॥ एवंच निरूपणयोः कार्य
कारणभावः॥ संगतिमुद्रयानोक्त इति न दोषः॥ निरूप्ययोरिव निरूपणयोरपि कार्यकारणभा
वः यथा कथं विजिज्ञासाद्वारा संगतिरित्यपि कश्चित्॥ इह प्रत्यक्षानुमानस्थले निरूपणयोः
प्रत्यक्षज्ञानानुमानज्ञानयोः एवंच प्रत्यक्षपूर्वकत्वेनानुमानज्ञानजननार्थं प्रत्यक्षज्ञानस्य
प्रथममपेक्षितत्वादादौ प्रत्यक्षमभिहितमिति भावः॥ निरूपणयोर्जन्यजनकशब्दयोः का
र्यकारणभावः प्रयोज्यप्रयोजकभाव इत्यर्थ इति तु कश्चित्॥ अथ तत्पूर्वकं त्रिविधम
नुमानं पूर्ववत् शेषवत् सामान्यतो दृष्टं चेति सूत्रं अथ प्रत्यक्षलक्षणानंतरमनुमानं उच्यत
इति शेषः त्रैविध्यं दर्शयति॥ पूर्ववदित्यादिना पूर्वं कारणं तल्लिंगकं यथा अंशतंतुसंयोगेन प
टोपपत्त्यनुमानं शेषः कार्यं तल्लिंगकं यथा इच्छा द्रव्याश्रिता गुणत्वादिति यद्वा पूर्वमन्वयो
शेषो व्यतिरेकि साध्यकं अन्वयव्यतिरेकिसाध्यकमित्यर्थः॥ अत्रैतेनानुमानमनुमितिःकार
णलिंगकेत्येवं व्याख्येयं सूचितं यत इत्यर्थात् तस्य तादृशानुमितिर्यत तदनुमानमिति वा
स्यात् अनुमितिकरणस्यापि लक्षणं उक्त्वा फलयोगव्यवच्छिन्नं कारणं करणमिति मतेन चं तीय

गपरामर्शे एवानुमानमित्यनुमानपदं यथाश्रुतार्थकमेवतत्र एतद्विना व्याहतत्वमितिव्य स्या
ह्नीसादिना साध्यसाधनतत् सहचारपक्षादिप्रत्यक्षपरिग्रहः अनेन तत्सूत्रमिति तत्सदनेन इं
द्रियार्थसन्निकर्षासन्नत्वेन प्रत्यक्षस्य इंद्रियार्थसन्निकर्षोत्पन्नमित्यादि पूर्वसूत्रेण … क्रांतस्य
परामर्शत्वेन स्वरूपनिरूपणयोः फलनिरूपणयोश्च कार्यकारणभावावगमः अन…
मुख्यफलनिरूपणानुमितिकरणनिरूपणयोरेवोपजीव्योपजीवकभावलाभे …
स्यादितिध्येयं न न्वेवमपि सूत्रप्रक्रमोपादानेपि अनन्तरक्रमोनोपपादितइत्यत आह।
श्री अत्रापीति ॥ अत्रापि अ नुमानखंडेपि सहचारप्रत्यक्षेति ॥ यद्यपि व्यभिचारज्ञानसंविरह
रहितं सहचारदर्शनं व्याप्तिग्राहकमित्युक्तं तच्च प्रत्यक्षं विशेष्यमिति कथं तन्निरूपणं
हेतुत्वं तथापि प्रत्यक्ष म प्रतिपाद्य अप्रत्यक्षं व्याप्तिग्राहकमितिबोधयितुं न शक्यते …
पि प्रत्यक्षनिरूपणं हेतुरितिध्येयं ॥ अत्रापि प्रत्यक्षखंडे इंद्रियत्वेन इंद्रियत्वेन ज्ञानं प्रत्य
क्षमिति लक्षणकरणं तु पदकरणनिरूपणयोः कार्यकारणभावावगमः। तत्स्यूतेन रूपेणा
॥८॥ नुमाननिरूपणस्य अनुमानोपमानयोरपि क्रमनियामकेमात्र एवमिति … मा
नस्योपमानांतर्गतत्व सुप्रसक्ततया न निराकृतं उपमानस्यानुमानांतर्गतत्वं …
एकदेशिना मनुमाने नैवोपमानकार्यान्यथासिध्युपगमात् ॥ अतएव उपमानखंडे अनु

मानभिन्न[illegible]मानं निरूपितम् ।। तत्तदथमनुमानं आह निरूपितमिति ।। भावः ।। नत्वनु
लक्षणे कर्तव्ये अनुमितिः ।। किमिति लक्षिते स्यत्तत्राह ।। लक्षणस्वरूपेति ।। लक्षणं तत्करणमि
त्यादिना स्वरूपं तत्त्वेत्यादिना प्रामाण्यमथानुमानं प्रमाणमित्यादिभावः ।। प्रामाण्यादिमि
रिति ।। तत्तायाप्रकारतायां निरूपणं शब्दस्तथा च लक्षणस्वरूपप्रामाण्यादिप्रकारकशाब्द
विषये ऽनुमाने विशेषणत्वेनानुप्रविष्टा इयमनुमितिर्वेद्यत्वात् ।। अथ मांतान्वयविरोधः
तथा चाधारसप्तमीस्वविषयनिरूपणप्रकारत्वं संबंधः प्रकारत्वं विषयत्वं च व्यापारानु
बंधिविषयतया बोध्यं ।। अनुमाने निरूपणीयमिति सतिसप्तमी ।। अनुमाननिरूपणे कर्त
व्य इत्यर्थ इति कश्चित् ।। अनुमाने निरूपणीये अनुमाननिरूपणार्थं तथा च निमित्तसप्त
मी अनुमानस्य विशेष्यतया निरूपणस्य च विशेषणतया पूर्ववाक्येन बोधितत्वात् ।। अनु
माननिरूपणेति ।। परामर्शासंभवाद्विशेषणस्य निरूपणस्य निमित्ततयोतविहि
ति निमित्तत्वं विवक्षितं तीनु योक्तमित्यन्ये अत्रोभयत्रापि अनुमितिर्निरूप्यत इत्यन्वयः
ननु भवतु सर्वत्रानुमितेः प्रवेशः अनुमिति ।। घटितमेवानुमानलक्षणं किमिति
कृतं अन्यथापि तल्लक्षणसंभवादाह ।। करणस्येति ।। अत्र मूर्तिकरणत्वं तत्त्वकि यामेये
[illegible] भिन्नं मेयो वैजात्यं तथा च प्रत्यक्षादिकरणताऽतोनुमितिकरणतायाविभिन्नसमेक

प्रत्यक्षानुमानयोर्विभिन्नप्रमाणत्वं व्याप्तिशाब्दबोधविषयस्यैकस्य स्मरणस्याभिन्नत्वेऽपि शाब्दानु
मानत्वेन पृथक्कृत्रमायाव्यवहारोऽतत् तथा च प्रत्यक्षप्रमितितोऽनुमितेर्वैलक्षण्य शानार्थअनुमि
तिलक्षणमितिभाव॥ अत्र क्रियालक्षणवान्यैकर्मधारयोत्तरेति नन्वभाव प्रत्ययस्य सामा
नाधिकरण्याभावः॥ तयोः पदार्थत्वावच्छेदकत्वेनानन्वय तत्पदे नीलोत्पलत्वयोरेव लक्षणा गौर
वात् नीलत्वोत्पलत्वयोरभेदस्य बाधितत्वात्॥ नीलोत्पलपदान्नीलाभिन्नोत्पलत्वेनानुभावापत्त्याऽयाता
च॥ द्वितीये नीलोत्पलयोर्नीलत्वोत्पलत्वयोरभेदस्य वीर्यं नीलत्वोत्पलत्वसामानाधिकरण्यप्र
मित्येवं नीलप्रत्यया र्थे तादृशसामानाधिकरण्येऽवच्छेदकतासंबंधेन प्रकृत्यर्थस्य नीलो
त्पलस्यान्वयोपपादने नैकदेशान्वयाभावेऽप्यनंतशक्तिकल्पनापत्तेः॥ एवं घटत्वादौ प्रकृत्य
र्थतावच्छेदकधर्मप्रतिपादकं नीलोत्पलत्वमित्यत्र तादृशसामानाधिकरण्यस्येति कुलतिभे
दकल्पनमपीति॥ अत्र वदंति॥ घटत्वमित्यादौ कुत्सकेरेव प्रकृते तादृशसामानाधिकरण्य
लक्षणः॥ तत्र हि घटेतरावृत्तित्वे सति सकलघटवृत्तित्वेन प्रकारेण घटत्वमुपस्थाप्यते
अत्र प्रकृतितत्पुवघटस्यालाभः॥ इतरवृत्तित्वप्रतियोगिकाभावस्येति प्रसक्तत्वात्॥
इतरवृत्तित्वावच्छिन्नाभावस्याप्रसिद्धेर्घटत्वादौ बाधाच्च विशिष्टस्य शक्यतासंभवात्॥ व्यु
त्पत्तिवैचित्र्याच्च॥ एकपदोपात्तानां तावतां परस्परोपश्लेषेण बोधः॥ तत्र प्रकृतिजन्य

शि॰॥ टी॰॥ भ॰॥

॥१६॥ ॥१६॥

बोधे येन संबंधेन तस्य प्रकृत्यर्थतावच्छेदकधर्मस्य प्रकारता तेन संबंधेन इतरावृत्तित्वं तद्
ति मत्वं चार्थः तेन घटत्वमित्यादौ न कंबुग्रीवादिमत्त्वादेर्भानं नीलोत्पलम् इत्यादौ च नीलाभि
न्नमुत्पलं प्रकृत्यर्थः तत्र प्रकृत्यर्थतावच्छेदकं नीलाभिन्नोत्पलत्वं तत्र नीलत्वसमवाय्यभि
न्नसमवेतोत्पलत्वं तस्य चोवाधितता स्वरूपसंबंधेनैव प्रकृतिजन्यबोधे प्रकारता तेन
संबंधेन तद्वृत्त्यविधानेन च सामानाधिकरण्यस्यापि भानं अभेदांशस्य अधिकस्य भानेपि नी
लत्वसमवायिसमवायस्य भानादिति प्रमेय त्वमित्यादौ चेतरावृत्तित्वांशेन भा
सते अप्रसिद्धत्वात् ॥ किंतु सकलप्रमेयवृत्तित्वं न च गुणान्यत्वविशिष्ट सत्वमित्यादौ
विशिष्टस्यानतिरेकतया तदितरासमवेतत्वस्य मलत्वमित्यादौ च सकलमलवृत्तित्वस्य म
हत्परिमाणे बाधादनन्वयप्रसंग इति वाच्यं ॥ तदितरत्वव्यापकात्यंताभावप्रतियोगि
तावच्छेदकतद्वृत्त्यसत्ताभावप्रतियोगितानवच्छेदकधर्मत्व तस्यैव तदुभयपदेन
विवक्षितत्वात् ॥ तदितरत्वव्यापकेति करणान्त्वे च घटत्वमित्यादौ न द्रव्यत्वादेर्भानं । महत्
वत्त्वन्यायः एवं सति एकं चित्रमित्यादौ परिमाणादेः कथं न भानं न च प्रकृत्यर्थतावच्छे
दकनिरूपितत्वविशिष्टसंबंधेनैव तदितरावृत्तित्वं तद्वृत्तित्वं च प्रतीयते एकत्वनि
रूपितसत्तावायेन च परिमाणादिकमवृत्तीति वाच्यं ॥ एवं सत्यनंतत्वात्तिकत्वानावश्य

कत्वे घटत्वादिप्रातिस्विकरूपेण शक्तिरस्ति किमित्य राद्धितिवादिगौरव। सति स्फुटतया ॥ यद्वा ॥ धर्म
त्वेनैव शक्तिरस्तु प्रकृत्यर्थतावच्छेदकनिरूपितसंबंधेन तत्र प्रकृत्यर्थान्वयः ॥ तेन घटत्व
मित्यादौ न द्रव्यत्वादेर्बोधः ॥ अत एव गुणकिरणावल्यां पृथक्त्वमित्यादौ प्रकृत्यर्थतावच्छेदकावच्छे
देनैव गुणानां भावप्रत्ययः प्रतिपादयतीति प्रतीतिरता दृश्येण धर्मत्वेनैव त्वस्य न्येदत दितिदीधिति
शि॰।। कृतः ॥ विशिष्यशक्तौ च नीलत्वोत्पलत्वे सामानाधिकरण्यं प्रकृते भावप्रत्ययार्थः ॥ नीलोत्पलस्य
प्रकृत्यर्थस्य तादृशसामानाधिकरण्येऽवच्छेदकत्वेनान्वयः ॥ घटपटत्वमित्यत्र द्वंद्वोत्तरस्य त्वनी
लोत्पलत्वमित्यत्र कर्मधारयोत्तरस्यापि भावप्रत्ययस्य सामान्येन शक्त्योपस्थिते तयोर्नीलत्वो
त्पलत्वयोः कर्मधारयोत्तरभावप्रत्ययतावच्छिन्नयाविशेष्यशक्त्योपस्थिते सामानाधिकरण्ये वि टी॰।।
शेषणत्वेनान्वयः नीलाभिन्नोत्पलत्वस्य च प्रकृत्यर्थस्याधेयत्वसंबंधेन नीलत्वोत्पलत्वयोर
वच्छेदकत्वसंबंधेन तत्सामानाधिकरण्येनान्वय इत्यपि कश्चित् ॥ बाधितेति ॥ बाधितावधित
तादृशसामानाधिकरण्यविशेषणकेत्यर्थः ॥ भ्रांतानुमितीति ॥ भ्रांतिः भ्रमः ॥ ननु वह्निव्याप्य
मानित्यादौ व्याप्तिविशिष्टत्वरूपदृष्टत्वस्य सामानाधिकरण्याप्रसिद्ध्या कथं तत्र ॥ ज्ञानत्वाभ भ॰।।
ावतिव्याप्तिं तत्र हेतुदृष्टत्वे व्याप्तिविशिष्टत्वसामानाधिकरण्यं यद्यालोकादौ प्रसिद्धं तस्य धू
लीपटले आरोपतया यथार्थानुमितित्वजनकव्याप्तिरित्यर्थः भ्रांतानुमितित्वजनकव्याप्ति
रित्यर्थः ॥ भ्रांतानुमितीति भ्रांतस्यानुमितिः भ्रमजन्ययथार्थानुमितिरित्यर्थः ॥ ३ ॥ था ।।४।।

दुक्तत्॥ संदर्भविरोधादुपेक्षितं नियमत इति। यत्र वह्निव्याप्यवान् वह्निव्याप्तिविशिष्ट पर्वतवृत्ति
धूमवांश्च पर्वत इत्याकारकः॥ परामर्शस्तत्र संभवेपि यत्र वह्निव्याप्यवान्नियेव परामर्शस्तत्र तद
भावादित्यर्थः॥ ननु तेन रूपेण हेतुत्वग्राहकत्वे तादृशबोधाभावस्तत्रानुमिति रूपफलजनीयेसतो
गौरवेनेयोति॥ ननु सामानाधिकरण्यमेकाधिकरण्यासंबंधः॥ एवं च समूहालंबनात्॥ विशिष्ट
ज्ञानस्य भेदान्यथानुपपत्त्या विशेषणप्रतियोगिक विशेष्यानुयोगिकसंबंधाविशिष्टधीविषय
त्वेनाभ्युपेयः तथा वह्निव्याप्यधूमवान् पर्वत इत्यत्र धूमे वह्निव्याप्तिवैशिष्ट्यानुयोगित्व पर्वतवृ
त्तित्व प्रतियोगित्वरूप तदुभयसामानाधिकरण्यं भासत एवेत्यत आह संबंध संबंधेति॥ समूहा
लंबनाद्भेदान्यथानुपपत्त्या अनुयोगित्वादिरूप प्रतियोगित्वादिरूपसंबंधभानवत्॥ सामाना
धिकरण्य भानमपि भविष्यतीत्यत आह संबंधेति कश्चित्॥ संबंध संबंधाविषयकत्वेपि समूहालंब
नव्यावृत्तस्यैतस्य विशिष्टज्ञानत्वस्योपपादितत्वादित्यर्थः समूहालंबने सर्वत्रैव विशेष्यता विशि
ष्टज्ञाने विशेषणे प्रकारता संसर्गेन्न संबंधता विशिष्यविशेष्यतारव्य विषयतेति विषयावैलक्ष
ण्येपि विषयतावैलक्षण्यादेव वैलक्षण्यं विशिष्टज्ञानस्येति भावः॥ ननु विषयावैलक्षण्येपि वि
षयताविशेषात्॥ ज्ञानवैलक्षण्ये जितं साकारवादिनात थाचार्थेनैव धियां विशेष इत्यनुरोधात्॥

।म्रऽऽलंबन विषयोऽनुयोगित्वं प्रतियोगित्वं च विशिष्टधीविषय इत्यभ्युपेयमत आह॥ भ्रमरूपेत्यु
इति रूप्येव द्विमानिति भ्रमानुमितिरूपेत्यु इत्यर्थः॥ ननु सदेव सामानाधिकरण्यं तत्र प्रसिद्धमत आ
ह॥ असदिति असतो वैशिष्ट्यस्य सदुपरागेण्यापि भानस्य निरासादित्यर्थः॥ नच प्रतियोग्यप्रसिद्धिः ।०
न०।७ उक्तविशेष्यत्वावच्छिन्नराजतत्वप्रकारकत्वस्य रजतत्वप्रकारतासामान्यस्य वाधात॥ किंचित्प्रमात्व
घटकप्रकारतानियामकसंबंधनिरूपितत्वनियमवच्छेनार्थतत्त्वान्निरासात्॥ असद्वैशिष्ट्य
भाने तु रजतत्वप्रतियोगिकशुक्त्यनुयोगिकवैशिष्ट्यस्य किंचित्प्रमात्वघटकप्रकारकतानि ट०।०
शि०।८ यामकतया शुक्तौ रजतत्वसामानाधिकरण्येऽव्याप्तिविशिष्टत्वपक्षश्चैतस्य योरन्वयबाधे पिता
दृशेऽश्नानान्वयेऽबाधात॥ तथा च तादृशज्ञानजन्यत्वं लक्षणं नाव्याप्तिमत आह॥ अवांतरेति तथा चैतादृशल
क्षणेनैतादृशलक्षणप्रतियोग्यमिति भावः॥ लक्षणाव्याप्तिमुक्ता लक्षणपदवाक्यजन्यत्वे शाब्दबोधानुपपत्तिम भ०।०
प्याह अवांतरेति तेन कश्चित॥ विशेषणे विषयतावच्छेदेन शशसंबंधेति शशविषाणेऽस्य च षष्ठ्यर्थलक्षणाया
शशसंबंधि विषाणेति शाब्दबोधे शशसंबंधिभेदस्येव शशसंबंधभावस्यापि विषाणनिर्णयो विरोधीत्यर्थः॥
प्रमाणप्रस्तावादिति प्रमाणतत्त्वमिह विविच्यत इत्यर्थः तेः प्रमाकरणलक्षणलक्षणस्यैव प्रस्तुतत्वेन ।।प
वाच्यशि० तदर्थं प्रमालक्षणस्यैवोचितत्वादित्यर्थः॥ प्रमैवेति॥ ननु प्रमाकरणलक्षणार्थं योगिनी भ्रांतिरपी
त्यर्थः। उपाध्यायमते पक्षतावच्छेदकसामानाधिकरण्येनैव साध्यंसर्वजन्यमिति विषयः॥ नन्वनुप

क्षतावच्छेदकावच्छेदेनापि अवच्छेदकत्वस्य व्यापकत्वे घटत्वेन साध्यस्य संबंध विधया भानासंभवात्
तथा च गंधप्रागभाववदवच्छिन्नो घटो गंधवानित्यनुमितिः ॥ प्रमेयत्वेसतो यदि चेति पक्षतावच्छेदकावच्छेदेन
साध्यभानस्यानुभवविरुद्धत्वात् संसर्गाग्रहादि सामान्य सामग्री बलादनुमितावप्यवच्छेदकत्व भासताद्
वेति भावः ॥ चरमेति ॥ प्रथमज्ञानपदस्य तत्तत्त्वे तज्ज्ञानवत्यतिव्याप्तेरिति भावः अप्रमापरमिति ॥ यावज्ज्ञ
मभिन्नत्वं प्रमात्वं ॥ अव्याप्येति अव्याप्ये व्याप्यत्वावगाहिनो अपक्षधर्मे वा पक्षधर्मत्वावगाहिनेत्य
र्थः ॥ हेतौ तो वस्तु गत्या साध्यवान्यः ॥ पक्षवृत्तित्वावगाहितया ननु वस्तुगत्या साध्यवान् यः पक्षस्तत्र
त्रेश्वरस्यैव तादृशज्ञानं प्रसिद्धं मतसंजन्यत्वस्य तदनुमितौ सत्त्वाभावात् अत आह ईश्वरे
ति ॥ अतिप्रसंजकत्वादिति ॥ तादृशापरामर्शत्वेन तस्य हेतुत्वाभावादुपादानमसूक्ष्मत्वेन तज्ज्ञा
न्यत्वस्य प्रमामात्रेऽतिप्रसक्तत्वादिति भावः ॥ अत एव तादृशप्रमानुमितावव्याप्तेरेव तज्ज्ञानं
वेति ॥ व्याप्तिविशिष्टेत्यत्र पक्षधर्मताज्ञानमित्येवं रूप समभीतत्वरूपापि नेत्यर्थः ॥ पदार्थ
तावच्छेदके तन्नत्वेनैव स्वरूपैकदेशस्य द्वंद्वापुनादकस्यानुपपत्तिः ॥ एकविषयत्वाभावादिति वा
च्यं ॥ पदजन्यप्रतीति विशेष्यरूपस्य पदार्थस्य भेदापेक्षया पदजन्यप्रतीति विषयभेदेऽप
वद्वंद्वस्य बाधकेन कल्पनात् ॥ एवं च नीलघटयोरिप्सत्र पदजन्यप्रतीति प्रकारभेदात् ॥
च यद्यपि जविशेष्यभेदात् द्वंद्वस्य प्रसक्तिः ॥ अपेक्षा इत्यर्थ नानार्थ स्वरूपैकदेशस्य
सार्थकत्वाद्यथाश्रुतेनानुपपत्तिरिति ॥ ननु नीलघटयोरभेद संसर्गादौ द्वित्वं कुत्रान्वेतु न गा

र । द्विशेष्ये ॥ तस्यैकत्वात् । न विशेषणेत योः पदार्थतावच्छेदकत्वेन निराकांक्षितत्वात् नन्वप्रकृत्यर्थ इति
संख्यावाचकत्वं सुपामेतु तन्मात्र इति संख्याबोधकत्वं । अत एवैकस्मिन्न्यायः परमाणोश्च य इत्यत्र
कृत गुणानामेयन्तद्विवचन समर्थितं वर्द्धमानोपाध्यायैरिति वाच्यं ॥ एकस्मिन् घटे शुक्लो घट इ
त्यत्रासाधुत्वश्रीनाभाव दशायां शाब्दबोध । प्रसंगात् । तत्र द्विवचनं यदसाधुत्वायैवेति चेत न हि कर्म
धारयस्तुवास्तु किमर्थं पदार्थभेदमनादृत्य द्वंद्वकल्पनेमिति चेत् ॥ नीलघटयोरित्यत्र कर्मधारये
नीलाभिन्न घटत्वेनोपस्थितौ अभेद इत्यस्य निराकांक्षत्वादनन्वयप्रसंगात् ॥ ननु पदार्थयोरभेदस्थले
पि द्वंद्वस्यासाधुत्वे कर्मधारय ॥ किमर्थं पृथगंगीक्रियत इत्यत आह ॥ पदार्थद्वये ति ॥ तथा च तथा च टी० ॥
यत्राभेदसंसर्गकभवोधेतात्पर्यं तत्र द्वंद्वासाधुत्वात् ॥ कर्मधारयादेव ॥ तादृशबोध इति भावः ॥ भेदा
भेदौ दासीनेति ॥ भेदाभेदाविषयकेत्यर्थः ॥ इदं चैतादृशपदार्थद्वयबोधे विशेषणं पदार्थयोरभेद
कर्मधारयवत् पदार्थयोर्भेदे एव द्वंद्व इत्यनुशासनस्वरससिद्धमतमनुसृत्याह विशिष्टपद
स्येति ॥ यत्तु । एकस्मिन्नेव । चैत्रे चैत्र स्वचैत्र संबंधानां पदजन्यप्रतीतिविषयाणां भेदेन द्वंद्वा भ० ॥
पत्तिरतो विशिष्टेति । तदसत् ॥ एकपदे द्वंद्वस्य तदपवादकैकशेषस्याभावाद पितु मशक्य
त्वात् ॥ किं च समस्यमान प्रत्येक पदार्थयोर्विशेषणयोर्भेदस्तयोर्द्वंद्वापवादकोनत्वेकपदा

र्थयोरेव विशेषणविशेष्ययोर्भेद इति नायं पंथाः धर्मपरतयेति। नपुंसके भावे क्त इत्यनु
शासनाद्व्याप्तिवैशिष्ट्यमेव व्याप्तिविशिष्टशब्दार्थः॥ तथा च व्याप्तिविशिष्टपक्षधर्मतायेदयोर्भे
द इति भावः॥ एतेन वैशिष्ट्यशक्तधातूत्तरक्तप्रत्ययस्याश्रयोपस्थापकस्याश्रयत्वे लक्षणायां व्या
प्तिवैशिष्ट्याश्रयत्वोपस्थितौ व्याप्तिवैशिष्ट्याश्रयस्य पक्षधर्मत्वज्ञानजन्यत्वमर्थः स्यात्॥ त
था च व्याप्यवानिति परामर्शस्य संबंधसंबंधसंबंधविषयकत्वात्॥ सैवाव्याप्तिरिति परास्तं ए
वमपि एकत्र धर्मिणीति विशेषणेऽपि मीमांसकेन तत्॥ तथा च व्याप्यवानिति शाब्दपरामर्शो
त्पत्तौ यानुमितिस्यात्सिः धूमत्वावच्छिन्नव्याप्तिवैशिष्ट्यज्ञानं धूमत्वावच्छिन्नपक्षधर्मताज्ञानं
चेत् कारणमिति कारणताद्वयकल्पने गौरवं गृह्यमाणव्याप्यतावच्छेदकधर्मप्रकारकपक्षध
र्मताज्ञानत्वेन हेतुतौ तौ च तत्कालीनत्वतद्गुरुषीयत्वप्रवेशादनंतकार्यकारणभावापत्तिरिति
मिथ इति तदुभयं व्याप्तिविशिष्टत्वपक्षधर्मत्वोभयं तु पक्षे पः परस्परसामानाधिक
रण्यं अव्यापकत्वात्॥ व्याप्यवानिति परामर्शेति द्वसंभवादित्यर्थः॥ न च तदुभयेति॥ तदुभ
यविषयत्वं नियतधर्मः॥ परामर्शत्वं परामर्शत्वं अयस्य परामर्शत्वेन हेतुतायां भानाभावादि
त्याशयः। न च तद्ग्रहस्य तत्त्वेन हेतुत्वात्॥ वह्निव्याप्यो धूमोऽयं पर्वत इत्यादिज्ञानजन्य
प्रेयसोऽतिव्याप्तिरेवेति वाच्यं॥ अनेकवृत्तित्वेन धर्मस्य विशेषणत्वात्॥ तद्व्यक्तित्वस्यैव

कमावच्छेदकत्वात्॥ विषयस्य तत्त्वेन कारणत्वं नास्तीत्याशयेनेति केचित्॥ पक्षधर्मतेति॥ पक्षधर्म
ताविषयत्वे निरूपितधर्मावच्छिन्नं इत्यत्र कोऽर्थः पक्षधर्मताया:। पर्वतसंयोगादिरूपतया धूमसमा
भावसहचरितवह्निमान् पर्वतः इत्येवमाकारकज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यताश्र
ये पर्वतो धूमवान् तवेति संशये तिव्याप्तिः स्यादतस्तद्वारणाय व्याप्तिविषयत्वे भावद्वयकन्न
चैवं मापिधूमव्याप्यधूमव्याप्याभावसहचरितवह्निमानित्येवंरूपसाधारणधर्मवद्धर्मि
त्रि०॥ ज्ञानजन्ये पर्वतो धूमव्याप्यवान् नवेति संशये तिव्याप्तिरिति वाच्यं पक्षधर्मताविषयकत्वदले
भावितद्वारणात् तथा च व्याप्तिविषयकत्वदलस्य संशयविशेषे तिव्याप्तिवारकतया व्यावर्त्त ही०॥
कत्वे प्रसिद्धेन तु पक्षधर्मतापदस्येत्याशयात्॥ धूमवत्पर्वतसंयोगप्रत्यक्षसंबंधितावच्छेद
कधूमप्रकारकपर्वतज्ञानत्वेन हेतुत्वात् चोव्याप्तिरतः पक्षधर्मतापदोपादाने वैय्यर्थ्यमुक्त
मित्यपि केचित् व्याप्तिज्ञानत्वे परामर्शत्वावच्छिन्नकारणताद्वयलाभाय व्याप्तिविषयत्वनि
यतत्वं विकाशाकतेयाउक्तमित्यन्ये॥ वस्तुतस्तु॥ पक्षधर्मताविषयत्वनियतेत्यस्योपादाने धूम भ०॥
वान् पर्वतो नास्तीत्यभावबोधिकप्रत्यक्षेतिव्याप्तिरिति वाच्यं॥ निष्कृष्टमते व्यासेरन्तीद्दिशत्या
तदवच्छिन्नप्रतियोगितावच्छेदकधूमप्रकारकपर्वतज्ञानजन्ये तिव्याप्तिरतो व्याप्तिविषयके सा
।।चे॰।। नश्यकं॥ मन्तत थापि वह्निव्याप्यवान् पर्वतो नास्तीत्यभावप्रत्यक्षे प्रतियोगितावच्छेदकाभावस्या ।।१२।।

-तौ द्वियत्वात् ज्ञानत्वेन रूपेण हेतुताव्यभावलौकिकप्रत्यक्षं प्रत्येव तथा हेतुत्वात्॥ ध वंव्या॥ म
पदस्य भावमात्रपरत्वे भावप्रकारकत्वनियतधर्मावच्छिन्नकारणताप्रतियोगिककार्यता॥
लिङ्गत्वेव क्षपोऽनुमितिमात्रधवलक्षणं यातिपरं तु स्थूलविशेषेऽतिव्याप्तिर्भवतिपक्षधर्मता
ज्ञानत्वेन व्याप्तिरतिव्याप्तिश्चेसतीपि पक्षधर्मतापदोपादानवैयर्थ्यमुक्तमितिध्येयं॥ वस्तुतो वि
शिष्टवैशिष्ट्यबोधादावतिव्याप्तिवारणाय व्याप्त्यविषयकत्वेन जन्यं ज्ञानं विशेषणीयमिति
वक्ष्यति॥ तथा च पक्षधर्मताविषयकत्वनियतेत्यादिविवक्षयो धूमवत्पर्वतवानिति विशि
ष्टवैशिष्ट्यबोधे यास्तविषयकेऽतिव्याप्तिः॥ अतो व्याप्तिविषयकत्वनियतेत्यादि विशेषणमव
वश्यकं न च पक्षधर्मतापदमुपादाय तेन पक्षधर्मताविषयत्वेनैव जन्यं ज्ञानं विशेष्यतां त
वतापि विशिष्टबोधातिव्याप्तिवारणसंभवादिति वाच्यं॥ तथासत्यसंभवापत्तेः॥ पर्वतोव
ह्निमानित्यनुमितेरपि वह्निनिष्ठपक्षधर्मताविषयत्वात्॥ हेतुतावच्छेदकरूपेण पक्ष
धर्मताविषयकत्वोक्तौ च वह्निव्याप्यवत्पर्वतवानिति विशिष्टवैशिष्ट्यबोधेतिव्याप्तिः॥ व्याप्ति
प्रकारकपक्षधर्मताविषयकत्वोक्तौ च व्याप्यविषयकत्वस्यैव लघुत्वेन विवक्षणो विसंशायेनात्। दि
ति तु सारं व्याप्तिविशिष्टपदपक्षधर्मताज्ञानपदयोः कर्मधारये विशिष्टपुंस्त्व प्रकारकत्वात्॥ प
क्षधर्मताज्ञानत्वाच्चात् जन्यानुव्यवसायेतिव्याप्तिः॥ एकरूपेण जनकत्वोक्तौ च॥ संभवति वह्नि
व्याप्यधूमः धूमद्रव्यवान् पर्वत इति ज्ञानसाधारणत्वात्॥ तथापि पक्षधर्मताया व्याप्तिप्रकार

कथं विवक्षितं तत्रापूर्वं निरूपित प्रकारतावच्छिन्न व्याप्ति प्रकारकत्वं धूमो वह्नि व्याप्यो धूमवान्
च पर्वत इत्यत्र यथा तनिवरूपिता धूमनिष्ठा प्रकारता न व्याप्ति प्रकारतावच्छेदका किंतु धूमस्य
मुख्य विशेष्यतैवेति न तत्साधारण्यमिति ध्येयं॥ अत्रापि तादृशविवक्षणेपि वह्निव्याप्यो धूम
वानिति स्फुटो वह्निमदन्यो इति तत्रूपव्याप्ति प्रकारकत्व संभवे नास्याद तो विशिष्य व्याह॥ इत्थं
न समानाधिकरण्येति॥ भ्रमानुमितेरिति॥ पूर्वं भ्रमात्मक परामर्शजन्यायां विषयाबाधेन
भ्रमानुमितावव्याप्तिर्दुष्टेति भाव:॥ हृत्यनियामक संयोगेन साध्यतायां हेतुतायां वा काशा
नुमिति:॥ परामर्शस्य भ्रमैवस्यादतो हृत्तरनियामक संयोगेन साध्यतायां वा कानुमा
नुमिति:॥ परामर्शस्य भ्रमैवस्यादतो वृत्तिनियामकसंबंधेन हेतुता साध्यता प्रतीतियुत्स्यर्थ
२०॥ माह प्रत्रेति॥ समव्याप्याधेयत्व प्रतिपादनात्तु नितराम्मिती साध्ये व्यापकत्व प्रकारकेसा ७०॥
धनेच साध्यसामानाधिकरण्य प्रकारकमित्येवं व्याप्ति प्रकारकोतो पूर्वव्याप्ति निरास
स्यात॥ अत्रनु व्यापकत्व सामानाधिकरण्ययोरेतयोरप्यप्रसिद्ध्या व्याप्ति वारणं न संभ
वतीति भाव:॥ तथाच व्याप्तितावत्पदार्थानां व्याप्तिशरीर निविष्ट पदार्थानां तथाविधेति॥ व्याप्तिभा ८०॥
१२४॥ ने यत्र यस्य येन संबंधेन प्रकारता तत्र तेन संबंधेन तत्प्रकारकत्व मित्यर्थ तत्राधिकरणे
हेतुप्रकारकप्रभावे तादृशाधिकरणवृत्तित्व प्रकारक प्रतियोगितायां तादृशाभावप्र
कारकमित्यादिक्रमेणबोध्यं॥ नच व्यतिरेकिणीति तत्र पक्षधर्मतांशे दोषस्य भावव्यापका १४॥

प्रतियोगिधूमत्वस्यैव प्रकारकत्वादिति भावः॥ ननु धूमव्यापकवह्निसमानाधिकरण्याधू
मत्वस्य वह्न्यभावव्यापकाभावप्रतियोगिधूमत्वस्य वेज्ञानं वह्न्यभाववद्वृत्तित्वरूपव्य
भिचारधियं प्रति ग्राह्याभावावगाहितया तद्व्याप्यावगाहितद्व्याप्यावगाहित यावान विरोधित्वं त
थाभवतिहीति तथात्वात तथाभूतस्यापि अनाप्यस्यैव मणिमंत्रादिन्यायेन प्रतिबंधकत्वं कल्प्यत
इति भावः॥ ननु धूमव्यापकवह्निसमानाधिकरण धूमसामानाधिकरण्यग्रहसंभवानि
तिज्ञाने धूमसमानाधिकरण्यास्यंताभावप्रतियोगितानवच्छेदकवह्नित्ववानिति ज्ञाने च वह्न्य
भाववद्वृत्तिर्धूम इति व्यभिचारधीविरोधित्वसत्तातज्जन्य प्रसक्तेऽतिव्याप्तिः उक्तरूपस्य ज्ञे
नकत्वविवक्षायोसंभव उक्तरूपस्य तादृशाधूमसमानाधिकरणासंभवानिति ज्ञानस्य
साधारणतया जनकतावच्छेदकता दत आह॥ तथाविधेति॥ न तथा पक्षधर्मतांशे व्यभि
चारधीविरोधितासंभवादिति॥ तथा च तद्विशिष्टे व्यभिचारधीविरोधिधीविषयधर्मप्रकार
कतद्विशिष्टपक्षज्ञानजन्यत्वमर्थः॥ उक्तज्ञानं पक्षधर्मताभासते रासभत्वविशिष्टेन
व्यभिचारधीविरोधिधीधूमत्वविशिष्टतथा नेपि तस्य न पक्षधर्मताभानमिति भावः॥ ननु
धूमसमानाधिकरणयोस्यादित्यासेरवोक्तरूपव्यभिचारधीविरोधित्वे मानाभावः केवव्याक
व्यतिरेकव्याप्तौ न च वह्नित्वं धूमसमानाधिकरणाभावप्रतियोगिधीविरोधित्वे मा
नाभावः॥ तदवच्छेदकं धूमाववभावत्वं वह्न्यभावसमानाधिकरणाभावप्रतियोगितानवच्छ

दकमिति एवं समूहालंबनात्मकव्यभिचारधीविरोधित्वं वाच्यं॥ तथा यद्धूमव्यापकवह्निकालीनधू
मवान् पर्वत इति ज्ञानस्य सामानाधिकरण्याविषयकतयानेमित्युजनकस्य संग्राहकतया
कल्पस्यानुमितिजनकतावच्छेदकत्वात्॥ न च धूमव्यापकवह्निसमानाधिकरणधूमवान्
पर्वतः वह्न्यभावव्यापकभावप्रतियोगिधूमवान् पर्वत इति ज्ञानयोरन्यतरत्वमेव हेतुतावच्छेदकं सत्तल
घेव लक्षणे निवेश्यमिति वाच्यं॥ अन्यतरत्वघटकभेदानां विशेषणविशेष्यभावे विनिगमनाविर
हेण नानाकार्यकारणभावावश्यकत्वेन तदपेक्षया लाघवात्। अस्येकरूपे यौवहेतुत्वे कल्पनाथान्या टी०॥
य्यतादत आह॥ व्यतिरेकसहचारे चेति॥ भ्रमसंशयोत्तरेति भ्रमसंशयोर्यद्विपरीतज्ञान
त्वेनानुगमः॥ विपरीतं च व्यावर्तकिमात्रं॥ तेन स्थाणुत्वभ्रमोत्तरस्य पुरुषत्वाभावभ्रमोत्तर
स्य च पुरुषत्वप्रत्यक्षस्य नासंग्रहः॥ तदुत्तरत्वं चाव्यवहितोत्तरत्वसंबंधेन तादृशविपरीत
ज्ञानवत्त्वं प्रत्यक्षनिर्णयस्तु तन्नाव्यवहितोत्तरत्वे स्यात्तत्र्य क्रिविश्रांतत्वेपिन क्षतिः॥ न भं०॥
वा तत्संशयोत्तरतत्संशये व्यभिचार इति॥ उपाध्यायमते तन्निर्णये प्रति तदभावज्ञानत्वेनैव विरोधि
तात त्रोप्रामाण्यनिर्णयस्येव विशेषदर्शनादेरप्युत्तेजकतांग्रु वेंघ्यं जकाग्रहे अंधकारकालीनतत्संशयोत्तर
तन्निर्णयेव्यंजकग्रहावलोकसमवधानमप्युत्तेजकं वाच्यं॥ न चैवं पर्वतो वह्निमानवेति संशयानंतरं व
ह्निव्याप्यधूमवान् पर्वत॥ मा विवह्न्यनुमितिरप्रमावेति समूहालंबनात्मकापेक्षानुध्यात्मकमानसंपराम
र्शः ततः॥ पर्वतो वह्निमान्निश्चयानिस्त्वनुमितिस्तु ततः॥ पर्वतो वह्न्यभाववानिति लौकिकप्रत्यक्षं तत्रापे न०

शानुध्यात्मिकतत्पराभ्रमेऽपि पुनरनुभिस्यापत्तिः॥ एवं अंधकारस्थघटसंशयानंतरमालोकसमवधाने घटनि
र्णयानंतरं पुनर्विशेषादर्शने अयुक्ते घटसंशयानंतरं विनैव विशेषदर्शनं घटनिश्चयापत्तिः पूर्वोक्तेऽकस्मा
लोकसमवधानस्य सत्त्वादिति वाच्यं। तत्र कालावच्छिन्नविशेषदर्शनाद्यभावविशिष्टतद्विपरीतज्ञानाभावत्वेन त
न्निर्णयत्वावच्छिन्नं प्रति हेतुत्वात् इति॥ बाधनिश्चयस्य स्वातंत्र्येण विरोधितायां तु विशेषदर्शने तत्॥ कालावच्छिन्न
त्वेन देयं स्वमते च संशयोत्तरप्रत्यक्षत्वावच्छिन्नं प्रति विशेषदर्शनस्य न हेतुता अंधकारस्थघटसंशयोत्त
रप्रत्यक्षे व्यभिचारात्॥ न च तादृशविपरीतज्ञानविरोधित्वेन हेतुतास्ति विशेषदर्शनालोकादिसाधारणस्य विरो
धित्वस्यैकस्याभावात्॥ किंच विशेषदर्शनप्रयुक्तसंशयानंतरमालोकसमवधानस्य पुरुषांतरीयांधका
रस्थघटसंशयविरोधितः॥ सत्त्वात् तत्र तस्यापत्तिः॥ तत्पुरुषीयतादृशविपरीतज्ञानोत्तरप्रत्यक्षं प्रति तत्पुरु
षीयतादृशविपरीतज्ञानविरोधित्वेन हेतुत्वस्यात्कौचातिगौरवं पुरुषांतरीयविशेषदर्शनस्यापि तादृशविरो
धित्वस्वरूपयोग्यत्वादतिप्रसंगः॥ एवं तादृशविपरीतज्ञानवत्प्रत्यक्षनिर्णयत्वेन कार्यतावच्छेदकं आर्ष
समानप्रसञ्जनात्। किंच भ्रमसंशयोत्तरनिर्णये सामान्यसामग्रीसत्त्वे भ्रमसंशयोत्तरमपि सामान्यनिर्ण
यापत्तिः॥ दुर्वारैव तदुत्तरप्रत्यक्षेऽपि सामग्र्यंतरकल्पने त्वतिगौरवं मानाभावश्च॥ एवं च विशेषदर्श
नं इतरकोटिज्ञानविरोधितया संशयोत्तरतादृशप्रत्यक्षे उपयुज्यत इत्यभिसंधाय हेतुतामत इ
ति न च सर्वमततया विशेषदर्शनस्य विशेषणधीत्वेन हेतुत्वाद्धेतुतामत इति न युक्तं विशेषदर्शने

हेतस्य हेतुतया परामर्शत्वेन हेतुत्वविवक्षणेपि तत्रैनातिव्याप्तिरिति पूर्वपक्षिया आशयात्॥ विशेषणाधि
यो हेतुत्वाभिप्रायेणेदमिति कश्चित्। तथाविधेति॥ व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वेनैव सधृः॥ अत्र मा
दीति॥ अन्यथाव्यावर्त्तकधर्मदर्शन व्यंजकधर्मदर्शनालोकादिसाधारण्याभावेन व्यभिचारप्रसंगादिति स्वैस्य व्याप्य
शैखस्त्ववानयमिति दर्शनं चक्षैनु पीतत्रमविरोधीतिनततनः॥ श्वैस्य प्रत्यक्षं॥ केचित्तु विशेषदर्शनाद्यतिरिक्तयाव
त्कारणकालीनं तादृशसंशयोत्तरप्रत्यक्षं॥ प्रतितादृशसंशयविरोधिदर्शनत्वेन व्यावर्त्तकधर्मदर्शना
३०॥ दिसाधारणरूपेण हेतुता आलोकाभावप्रयुक्तसंशयोत्तरप्रत्यक्षे आलोकसमवधानं हेतुरित्याहुः॥ अ
त एव तथाविधनिश्चयत्वेन हेतुत्वविवक्षणादेव॥ लिंगवत्तादिकं लक्षणं स्वरूपं यस्य यद्वद्भूतो यो विदर्शनाख्या ३०
र्थस्तस्य यत् ज्ञानं वह्निव्याप्यधूमवत्पर्वतसदृशं महानसपदवाच्यमित्याकारकं तज्जन्या यो मित्यर्थः
तथाविधेति। वह्निव्याप्यधूमवत्पर्वतसादृश्यविशिष्टमहानसपदवाच्यत्वज्ञानत्वेनेत्यर्थः॥ न्याया
र्थेति॥ पंचावयवैरेकवाक्यतया बोधो जन्यत इति चिंतामणिकाररीत्या इदमुक्तं स्वमते तु उपनया
र्थविशेष्यनिगमनार्थविशेषणकशाब्दबोधे इति व्याप्तिबोध्यानन्तूपनयेव वह्निव्याप्यधूमवान् पर्व ३०॥
त सादृश्यविशिष्टमहानसपदवाच्यत्वज्ञानत्वेनेत्यर्थः॥ न्यायार्थेति॥ पंचावयवैर्वाक्यतया बोधो जं
३६ न्यत इति चिंतामणिकाररीत्या इदमुक्तं स्वमते तु उपनयार्थविशेष्यनिगमनार्थविशेषणशाब्दबोधे
ति व्याप्तिबोध्यानन्तूपनयेव वह्निव्याप्यधूमस्य पर्वते साक्षान्न प्रकारताभानं किंतु मतुबर्थसंबंधि
नोभेदसंबंधेन प्रकारतया भानमिति तादृशनिश्चयत्वेन हेतुत्वविवक्षयैव तत्रनातिव्याप्तिः॥ ३२

तथा चायमिस्कपनयोऽसिद्धयुवेत्यत आह ॥ तदुच्चेनेति ॥ यत्र वह्निव्याप्यधूमवत्पर्वतमेव बुद्धीस्थी
हस्यसोऽस्तीति शाब्दोऽभिहितः तत्र वह्निव्याप्यधूमवत्पर्वतोपस्थितो जन्ये वह्निव्याप्यवान्यवेतोऽस्ती
ति शाब्दबोधेऽतिव्याप्तिः ॥ ननु तदुच्चेतत् ॥ बुद्धिस्थत्वेनैवोपस्थितिः शाब्दबोधे च विशेषप्रकारकधीश्च
मानसीति न तत्र प्रसंग इत्यत आह ॥ संकेतेति ॥ यत्र वह्निव्याप्यधूमवत्पर्वतत्व व घटपदस्य
संकेत अज्ञात ॥ घटोऽस्तीति वाक्येन वह्निव्याप्यधूमवान्पर्वतोऽस्तीति बोधो जनितस्तत्रातिव्याप्ति
रित्यर्थः ॥ ननु मेहा वाक्यार्थज्ञानं नावान्तरवाक्यार्थज्ञानजन्यमतः कथं न्यायार्थज्ञाने तिव्याप्तिरत्रा
ह व्युत्पादयिष्यत इति ॥ पदजन्यत्वेति ॥ घटादिपदादाकाशयत्वादिसंबंधेनाकाशोपस्थितावपि शा
ब्दबोधानुदयात् ॥ स्वाय पदज्ञानजन्य पदार्थोपस्थितित्वेनैव हेतुत्वमित्यर्थः ॥ ननु घटशाब्दबोधं
प्रति वृत्त्या घटोपस्थापकपदज्ञानत्वेन कारणता स्वापदजन्यघटोपस्थितिर्व्यापारः ॥
व्यापारस्य हेतुता घटत्वप्रकारकज्ञानत्वेनैवावच्छिद्यते ॥ नन्वेवं प्रत्यक्षोपस्थिते घटे पदोपस्थितिव्यापारके घ
टपदज्ञाने सति घटशाब्दबोधापत्तिः घटशाब्दबोधे पदोपस्थितेरजनकत्वेनाव्यापारत्वात् ॥ नन्वेवमपि
घटपदजन्यघटोपस्थितौ सत्यां प्रकारान्तरान्तरेया घटोपस्थितेरपि शाब्दबोधजनकतापत्तिः ॥ इष्टत्वा
त् ॥ यजदेन्य पदार्थोपस्थितिसमवकाले शाब्दबोधानुदयस्यानुभवता सुपपन्नत्वात् ॥ तथा च पदार्थोपस्थि
ते हेतुतायां पदजन्यत्वाप्रवेशात् अतिव्याप्तिरत आह ॥ निश्चयाच्चस्थिति ॥ उद्बोधकविधया पदज्ञान
स्य हेत्सा पदजन्यपदार्थोपस्थितेरेकव्यापारवत्त्वेन तस्य च स्मरणरूपतया शाब्दबोधरूपतया वानि

प्र यभिंभत्वासंभवेनतद्वारणायसंशयान्यत्वस्यज्ञानत्वस्यचप्रवेशानर्थक्यादितिभावः॥केचित्तुय
दा र्थपरिच्छित्तिकारणतायांपदज्ञानजन्यत्वमधिकंनिविष्टंनिश्चयत्वंचनिविष्टमित्यतिव्याप्तेरसंतमसंभ
वदर्शनार्थमिदमित्याहुः॥तथापिपदयदार्थपरिच्छित्तिकारणतामादायातिव्याप्तिरेवाणेपितादृशप्रत्यक्ष
इतिवह्निव्याप्यधूमवान्पर्वतवानितिप्रत्यक्षइतिअर्थः॥शाब्दबोधइतिवह्निव्याप्यधूमवान्पर्वतंबुद्धिस्थी
कृत्यतद्वानितिशब्दप्रयोगेवह्निव्याप्यधूमविशिष्टपर्वतस्यतच्छब्दार्थतयातादृशविशिष्टवैशिष्ट्यावगाहि
शाब्देपदजन्यविशेषणतावच्छेदकप्रकारकधियोविशिष्टहेतुत्वकल्पनेपितादृशविशिष्टवैशिष्ट्य
बोधत्वावच्छिन्नंप्रतितादृशविशेषणतावच्छेदकप्रकारकनिश्चयत्वेनैवहेतुताप्रत्यक्षादिसाधारणीतामा
दायशाब्दबोधेअतिव्याप्तिरितिभावः॥चकारात्तादृशोपमितिसंग्रहः॥नन्वेतत्कारणतायांनिश्चयत्वंनि
शि॰॥॰ विष्टमतआह॥दंडोरक्तोनवेति॥रक्तदंडवानितिज्ञानंद्वेधा॥एकंविशेष्येविशेषणंतत्रचविशेषणांत टी॰॥॰
रमितिरीत्या॥अन्यच्चविशिष्टस्यवैशिष्ट्यमितिरीत्या॥तत्राद्यंपुरुषनिरूपितदंडनिष्ठविशेषण
तानिरूपितरक्तत्वविशेषणताशालित्वनिरूपितत्वंविषयतायांस्वरूपसंबंधविशेषःप्रतीतिसा भ॰॥॰
क्षिकःदंडोरक्तःदंडवानितिज्ञानेचदंडनिष्ठविशेषणताशालित्वनिरूपितत्वंविषयतायांस्वरूप
संबंधविशेषःप्रतीतिसाक्षिकःदंडोरक्तःदंडवानितिज्ञानेचदंडनिष्ठविशेषणतानिरूपितानरक्तत्व
विशेषणतेतितद्व्युदासःकारणंचतत्रतावद्विशेषणज्ञानमसंसर्गाग्रहश्च॥अतएवनिर्विकल्पकानंतरंदंडो ॥११॥
॥२१॥ रक्तोनवेतिसंशयानंतरंचतादृशधीःसार्वलौकिकी॥यदिचतादृशसंशयकालेविशेष्येविशेषणमितिरी

यायिरक्तदंडवानितिनधीः तदा तादृशबोधं प्रतिरक्तो दंड इति निश्चयाभावविशिष्टस्य तादृशसंशयः प्रतिबंधको वा
च्यः नच रक्तो दंडो नवेति संशयानंतरं इहभूतले रक्तदंडो नास्तीति मानसधीर्विशेषणमितिरीत्या स्यात् ॥ अभा
वे प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनो विशेष्यविशेषणमितिरीत्या भानस्याप्रसिद्धत्वेन तदवच्छिन्नप्र
तिबंधकत्वकं अनायाअयोगादिति वाच्यं । लौकिकप्रत्यक्षे इंद्रियसंबंधविशेषणतया इव अभावे सरक्तदंडो
यत्रासंसर्गाग्रहस्यापि अभावे रक्तत्वविशिष्टदंडत्वविशिष्टवैशिष्ट्यावगाहिबोधत्वस्यैव कार्यतावच्छेदकतया
तादृशबोधवारणात् ॥ वस्तुतस्तु ॥ अभावनिरूपितदंडनिष्ठविशेषणताशानिरूपितरक्तत्वसनिष्ठविशेषणता
शालित्वमेव विशेष्यविशेषणमितिरीत्या तदवगाहित्वं तत्र च रक्तदंडो नास्तीति विशिष्टवैशिष्ट्यबोधे प्रसि
द्धं ॥ तदवच्छिन्नं प्रति तादृशनिश्चयाभावविशिष्टसंशयस्यैव प्रतिबंधकत्वाच्च । संशयानंतरं निश्चयेन
तादृशविशिष्टवैशिष्ट्यबोधानुपपत्तिः ॥ अत एव विशेष्ये विशेषणमितिरीत्या विषयतयैव विशिष्टवै
शिष्ट्यबोधसाधारणी प्रवृत्त्यादिजनकतावच्छेदिका न च प्रवृत्त्यादिनियामिका एका विषयता तस्याः
च विशेष्ये विशेषणमिति विशिष्टवैशिष्ट्यमिति च विषयताद्वयमिति वाच्यं ॥ विशिष्टवैशिष्ट्यबोधे
पि विशेष्ये विशेषणमिति विषयताया नियामकत्वे तेन तदावश्यकत्वेन तत्र विशिष्टवैशिष्ट्यमिति वि
षयता नियामकसामग्र्याः प्रतिबंधकत्वकल्पने गौरवाच्च ॥ एवं खंडीश्वरं इत्यादौ एकत्वद्वयं एकविशेष

यविशिष्टे विशेषणांतरं वैशिष्ट्यमिति च विषयताद्वयं तत्राप्युक्तरीत्या चरमबोधे नु योगितावच्छेदकप्रकारक
धीर्हेतुः ।। एकत्र द्वयमिति विषयताद्वयाभ्युपगमेऽस्यैवमस्माकीनः पंथाः ।। अधिकं च शब्दालोकसारमंज
र्यां प्रपंचितमस्माभिः रक्तदंडवानिति विशिष्टवैशिष्ट्यबोधे तु रक्तत्वविशिष्ट दंडत्वविशिष्टनिष्ठप्रकारताव्या
सज्यवृत्तिरेकारस्तत्त्ववैशिष्ट्यादि किंच वैशेषिकं तेन रक्तवद्भिन्नमानसाद्ये विशिष्टवैशिष्ट्यबोधासंभवः ।। अन्य
व व्यासज्यवृत्तिः ।। रक्तत्वादि प्रत्येकनिष्ठप्रकारतामादाय तत्र ।। रक्तत्वादिप्रकारकमिति व्यवहारः ।। तत्र रक्तत्ववि
दि॰ शिष्टप्रकारकज्ञानत्वावच्छिन्नं प्रति दंडत्वविशिष्टविशेष्यताभावात् प्रकारकदंडत्वविशिष्टावच्छिन्नरक्तत्वप्रकारकरक्तज्ञानत्वं टी॰।।
कारणतावच्छेदकं तेन द्रव्यं रक्तं न वा दंडो रक्त इति ज्ञानस्य नासंग्रहः ।। न च द्रव्यं रक्तदंडश्च प्रमेयमिति ज्ञानस्य सं
ग्रहः ।। यद्वं दंडवच्च कमानि ति बोधेपि च रक्तत्वविशिष्टदंडत्वाभावात् प्रकारकत्वरक्तत्वविशिष्टावच्छिन्नवैशिष्ट्यज्ञानत्वेन
न कार्यतावच्छेदकमार्थसमाजग्रस्तत्वादिति मिश्रमतमयुक्तं । रक्तदंड इति निश्चयानुविधायि ज्ञानविशेषस्यानु भ॰।।
भवसिद्धतया दुरपह्नवत्वादिति । एवमनुमितावपि पर्वतत्वादि विशिष्टविशेष्यकव्याप्यप्रकारकनिश्चयत्वे
न हेतुत्वमिति तद्व्याप्यविशिष्टपर्वतत्वविशिष्टवैशिष्ट्यबोधेतिव्याप्तिः ।। एवं पर्वतो वह्निव्याप्यवान्नवेति सं
।।३४।। शये वह्निव्याप्यवान् पर्वतो द्रव्यमिति ज्ञानानुदयात् । एकविशिष्टे परवैशिष्ट्यबोधेप्यतिव्याप्तिर्द्रष्टव्या । दंडवा ।।१८।।
निसाद्ये तु दंडत्वविशिष्टवैशिष्ट्यबोधे दंडत्वप्रकारकधीत्वेन हेतुत्वं ।। तत्र धर्मितावच्छेदकाभिन्नस्य संशयस्या
प्रतिबंध्यतन्निश्चयस्याप्रवेशात् ।। दंडो रक्तो न वेति संशयानुव्यवसायस्थ न रक्तत्वविशिष्टदंडीयत्वावगाहि

किंतु रक्तत्वरक्तत्वाभावप्रकारकदंडधर्मिकज्ञानवृत्तावगाही विशेष्ये विशेषणमिति रीत्यावारत्तदंडज्ञानवृत्ताव
गाहीतिन तत्र व्यभिचारः॥ विशिष्टविषयोपधानेनेति तृतीयाप्रकारे घटमिच्छामीत्यादौ घटत्वविशिष्टविष
यित्वरूपस्यैव तदुपधानस्येच्छायां प्रकारत्वादिति प्रतियोगित्वाभावत्वे द्विषयित्वप्रकारिकात्वादेरनुप
स्थितत्वेऽप्यस्यैव प्रकारत्वाभ्युपगमात्॥ तथा च विषयितायां निरूपितत्वसंबंधेन घटत्वविशिष्टवैशिष्ट्यावगाहि
तादृशेच्छादिसाक्षात्कारे व्यभिचारान्न ज्ञानत्वं तादृशकारणतावच्छेदकमिति भावः। विनश्यदवस्थज्ञानादिच्छाद्वेष
योः साक्षात्कारः संभवति विनश्यदवस्थज्ञानजनितयोरिच्छाद्वेषयोः साक्षात्कारेणाभ्युपेयत इत्यस्य चेदाह
केते इति॥ साक्षात्कारोऽत्र कृतित्वांशे निर्विकल्पकरूपः कृतित्वस्य सविकल्पकस्य विषयांशे व विकल्पकस्य कृति
त्वांशे निर्विकल्पकस्यानुपपन्नसंभवादिति न च कृतिसाक्षात्कारपूर्वं प्रत्यासत्त्यर्थं विषयस्मृतेरावश्यकत्वे क
थं व्यभिचार इति वाच्यं॥ स्वविषयकस्वप्रकाशकत्वेनैव संस्कारादिसाधारणेन प्रत्यासत्त्वादिति॥ ननु त
तद्विशिष्टबुद्धौ तत्तद्विशेषणधीत्वेन हेतुत्वात्। कृतिसाक्षात्कारपूर्वं विशेषणधीनिमित्तं विषयस्मृतेराव
श्यकत्वे कथं व्यभिचार इति वाच्यं॥ स्वविषयकस्वप्रकारकत्वेनैव संस्कारादिसाधारण्येन प्रत्यासत्तित्वा
दिति॥ ननु तत्तद्विशिष्टबुद्धौ तत्तद्विशेषणधीत्वेन हेतुत्वात्। कृतिसाक्षात्कारपूर्वं विशेषणधीनिमि
त्तं विषयस्मृतेरावश्यकत्वे कथं व्यभिचार इत्यस्य तत्रापि ज्ञानत्वस्याप्रवेशं दर्शयति॥ विशेषणेति॥ इ

दंच विशिष्टज्ञानकारणप्रदर्शनाय विशेषणविषयत्वेनैव तत्र हेतुत्वात् विशेषणविषयकसंस्कारेण न
विशिष्टस्मृतिः।। समानविषयकत्वेनैव संस्कारस्मृत्योः कार्यकारणभावादतस्तदुपदर्शनायाह।। विशि
ष्टसंस्कारादीति तद्विषयकगुणानां तादृशविशिष्टविषयकगुणानां तेन तादृश विशिष्टवैशिष्ट्यबोधो
ऽजन्यश्च गुणानामिति स्वरूपनिर्देशमात्रं विशेषणतावच्छेदकप्रकारकसंशयान्यत्वेन प्रकारणता विशे
षणतावच्छेदकवत्संशयान्यत्वेन वा हेतुतेति ध्येयं न च रक्तदण्डांशेऽनुद्बुद्धसंस्कारवतः पुरुषांशे लौकिक
शि०।। सन्निकर्षवतो रक्तदण्डवान् पुरुष इति विशिष्टवैशिष्ट्यबोधापत्तिः ज्ञानस्य प्रत्यासत्तित्वेऽपि रक्तदण्डो
न वेति संशयादशायामपीति वाच्यं।। तत्र प्रत्यक्षे अविशेषं प्रति तत्तदुद्बोधकानामपि तत्तत्कारित्वेन
हेतुत्वात् भवतामपि तद्वाच्यं।। तत्र प्रत्यक्षे अविशेषेत्र तत्तदुद्बोधकव्यक्तिविशेषाणां स्मृतिविशेषहेतुत्वस्या
वश्यं कल्प्यत्वे संस्कारप्रयोज्यतादृशविशिष्टवैशिष्ट्यबोधं प्रति स्मृतिव्यक्तिकल्पनायां गौरवं प्रसा टी०।।
ञ्जकत्वात्।। न च यत्र पुरुषसन्निकर्षदशायां नोद्बोधकसमवधानेन स्मृतिस्तत्र तादृशोद्बोधकस्य प्रत्य
क्षव्यक्तिप्रत्ययहेतुत्वकल्पने गौरवम् एकस्यानेनैव पुरुषसन्निकर्षदशायां रक्तदण्डगोचरानुद्बुद्धसं भ०।।
स्कारसत्त्वात् तादृशप्रत्यक्षापत्तिरिति वाच्यं।। यत्र पुरुषसन्निकर्षदशायामेव तादृशसंस्कारोद्बोधकसम
वधानेन तादृशविशिष्टवैशिष्ट्यप्रत्यक्षं जनितं तत्र तादृशसन्निकर्षाभावकाले स्मृतिवारणाय तादृशो
।।१६।। द्बोधकव्यक्तेः स्मृतिहेतुत्वकल्पनाया भवतामपि तुल्यत्वादिति।। अत एव तत्तत्संस्कारस्यैव प्रत्यभिज्ञाया ।।१६।।

हेतुरिति प्राचीनाः॥ मणिकारमते तु प्रतिबंधकाभावे सति वोद्बुद्धसंस्कार एव स्वयं स्मृतिरयितत्वा स्मृतिरेव प्र
त्यभिज्ञादौ हेतुरिति नानुसंभवः॥ अनुमितावपि ज्ञानत्वस्य हेतुतावच्छेदकेऽप्रवेशादत आह॥ इत्यादि
तीति॥ नन्विच्छादितोऽनुमितिरूपस्य घटत्वप्रकारकत्वाद्यर्थान्तर्भावेनाऽप्यनुमित्यभावस्य निर्णेतुमशक्यत्वाद
त आह॥ संस्काराश्चेति॥ अजन्यत्व स्थूलत्वकान्तर्भावेनानुमित्यभावः सुनिश्चय इति भावः॥ ननु तथा
प्यनुमितौ ज्ञानत्वेनैव कथं हेतुता संस्काराद्यन्यत्वेनापि हेतुत्वस्य वक्तुं शक्यत्वादत आह॥ संस्काराद्यन्य
त्वे सतीति॥ तच्चानुमितौ ज्ञानत्वेनैव तादृशनिश्चयघटकतया विषयत्वेनेति॥ अत्र इदं पश्यामीत्य
नुव्यवसायसाक्षिको लौकिकत्वनियामको विषयताविशेष एव कार्यताकारणतयोरवच्छेदक॥
पद भावात्॥ सुरभिचंदनमित्यादौ सौरभं पश्यामीति धीः अत एव कुसुमांजलिप्रकाशे
साक्षात्कारित्वावच्छिन्नविषयताघटितमेव लौकिकप्रत्यक्षलक्षणमुक्तं वर्द्धमानोपाध्यायैः त
त्ता दृशो विषयतया प्रत्यक्षत्वं कारणतावच्छेदकं तेन न परमाण्वादिसाधारणता दृशवि
षयितावत्त्वस्य प्रत्यक्षत्वं कार्यतावच्छेदकं तेन विषयजन्यसर्वांशोपनीतभानव्यावृत्तिः॥ न च सर्वांशो
पनीतभानासिद्धिः सर्वांशभानसामग्रीसत्त्वादिति वाच्यं॥ कामिनीजिज्ञासादिवशाद्गात्रादौ विष
यकत्वस्य संभवात् तादृशप्रत्यक्षस्य च तादृशविषयतासंबंधेन कार्यता तादृशविषयस्य च तादा
त्म्येन हेतुतेति सतो न व्यभिचारः॥ तत्त्वसंदिग्धविषयकप्रत्यक्षे अवश्याभ्युपेय विशेषकार्यकारण

भावेनैवाति प्रसंगभंगे ज्ञानप्रसंगे स्यक्षेच्छा नत्वादिना हेतुत्वकल्पनमेवाप्रामाणिकमित्याशयेना
ह ॥ केचिदिति ॥ तदितरत्वादिरिति द्वंद्वात्तरः श्रूयमाणस्तत्प्रत्ययः प्रत्येकान्वयीतेन तत्वेतदितर
त्वे इत्यर्थः ॥ तत्तद्विषयकत्वेन तत्तत्तदितरत्वादिधर्मबुद्धिविषयकत्वेन प्रत्यक्षस्यकार्यता ॥ तथा च व्याप्तिप्रका
रकपक्षधर्मताविषयकसंशयान्यज्ञानत्वेन तादृशतद्विषयकप्रत्यक्षत्वेन कार्यकारणभाव इति भावः ॥
परामर्शीत्व घटकदलत्वं च तुष्टयस्य प्रदर्शनायाह ॥ चैत्रावलोकितेत्यादि वृत्तुष्कानीलेतर घटत्तद्विष
यकत्वानेस्त्रापि द्वंद्वात्परत्व प्रत्ययस्य घटेनोपि संबंधः ॥ ननु प्रामाणिकत्वया गौरवं न दोष इत्यत आ
ह ॥ मानाभावादिति ॥ ननु तादृशकार्यान्यनुपपत्तिरेव मानमत आह ॥ अन्यथोपपत्तेश्चेति ॥ विशिष्टस्म
रणा इति ॥ व्याप्तिप्रकारकपक्षधर्मतास्मरणा इत्यर्थः ॥ पक्षे प्रामाण्यज्ञानास्कंदितेनापि स्मृति
जननात् तदनास्कंदितत्वं न स्मृतिजनकतावच्छेदकं परामर्शस्यानुमितिजनकतायां तु तदवच्छेदकमेवे टी॰॥
ति नातिव्याप्तिसंभवा नीतश्चापि तज्जातीयाप्रामाण्यज्ञानाभावस्य सर्वत्र निश्चयकारणतायामवच्छेद
कत्वादि निगमनाविरहेण स्यात्तं श्रयेण हेतुत्वस्यैवोचितत्वमित्याशयात् ॥ अप्रामाण्यं भ्रमत्वं प्रामा
ण्याभावश्च ॥ न चैवमेकस्मिन् स्थाने प्रामाण्यज्ञानप्रतिबंधकसत्वात् तदनास्कंदितज्ञानं तदाद मं॰॥
पिनानुमितिः स्यात् ॥ इष्टत्वात् ॥ अत एवाप्रामाण्यज्ञानानामननुगमेपि न क्षतिः यादृशाप्र
माण्यज्ञानसत्वे परामर्शसत्वेपिनानुमितिः ॥ तादृशज्ञानाभावकूटस्यैव हेतुत्वात् ॥ अन्यथा तु ॥२॥

रुचीया प्रामाण्यज्ञानाविषयपरामर्शादिनाहेतुत्वेनैतत् कार्यकारणभावकल्पनापत्तेः॥ अ-
ज्ञानम प्रमेयस्य प्रामाण्यधीसत्वे ऽनुमित्यनुदयप्रसंगा च्चयत्र विषयविशेषपरामर्शप्रामा-
ण्यज्ञानाभावस्तदभिप्रायेणोदमित्यपि कश्चित्॥ उपेक्षात्वे चेदे कं निवक्तुं शक्यते तज्ज्ञातद-
त्वेन हेतुत्वं वक्तुं युज्यत इत्यत स्तदेव दूषयति॥ उपेक्षात्वमिति॥ जातिसंकरेति॥ जगन्नाथादि-
चाक्षुषे उपेक्षात्वं विहाय चाक्षुषत्वं चाक्षुषत्वं विहाय उपेक्षात्वमिति॥ जातिसंकरेति॥ जगन्नाथा-
दिचाक्षुषे उपेक्षात्वं विहाय चाक्षुषत्वं चाक्षुषत्वं विहाय उपेक्षात्वं सामाद्ये वर्तमानं एकत्र चाक्षुषो-
पेक्षाज्ञाने संकीर्णमित्यर्थः॥ ननु चाक्षुषत्वादिव्याप्यं नानैवोपेक्षात्वं तावच्छेदः कृतः कारणता-
वच्छेदकतानदोष इत्यत आह॥ आंशिकेति॥ एकमेवज्ञानं किंचिदंशे उपेक्षात्मकं किंचिदंशे उ-
पेक्षात्मकं चानुभूयते उपेक्षात्वस्य जातित्वे तन्न स्यात्॥ जाते रनांशकत्वादिति भावः॥ प्रत्यक्षज-
नकस्यापि जिज्ञासितविषयस्यानुपेक्षात्वादाह॥ जिज्ञासितेति॥ तद्विषयजिज्ञासाजन्य-
जनकत्वमित्यर्थः॥ तेन कालांतरे जिज्ञासितविषयस्यापि ज्ञानस्य नोपेक्षात्वक्षतिः तादृशात्
तदृशावच्छिन्नात् संस्काराजनकत्वमुपेक्षात्वं॥ तुजनकतावच्छेदकेति॥ जनकतावच्छेदकाग्रहे जन-
कताग्रह एवसंभवी जनकतावच्छेदकं तु रचनास्येवेति भावः॥ ननूपेक्षान्यत्वेनेत दूषयतामत आह॥१०

अन्योन्याश्रयादिति॥ उपेक्षात्मकज्ञाने उपेक्षान्यत्वेन संस्काराजनकत्वज्ञानं संस्कारजनकत्वे च ज्ञाते तदन्यत्वरूप
उपेक्षात्वं ज्ञातव्यमित्यन्योन्याश्रय इत्यर्थः। रूपांतरापरिचयादिति पाठे अन्योन्याश्रयादित्यत्र हेतुः। रूपांतर
उपेक्षान्यत्वादिति रिक्तौ॥ ननु घटत्वप्रकारकैतद्घटविषयज्ञानस्य तादृशसंस्कारं प्रति तत्तद्व्यक्तित्वेन जन
कतां गृहीत्वा तादृशसंस्कारजनकतावच्छेदककूटवत्त्वमुपेक्षात्वं सुग्रहमेव अतएव नाशंकनीयमिति॥ एतत्
दूदांशा उपेक्षात्मकस्यापि ज्ञानस्य घटादौ घटांतरे वापेक्षात्वसंभवात्॥ ननु घटत्वप्रकारकैतद्घटविशेष्य
कसंस्कारत्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेन प्रतिबंधकत्वं तथा सति उपेक्षाज्ञाने विद्यमाने उपेक्षात्मकज्ञानां
तरादपि तादृशसंस्कारानुत्पत्त्यापत्तेः॥ तथा च घटत्वप्रकारकैतद्घटविषयकसंस्कारजनकतानु
तकूटवद्भिन्नत्वेन जनकत्वेन कोपि दोष इत्यत आह॥ संस्कारानुत्पत्तेरेवेति॥ अस्मरणसंभवे॥ उपे
क्षणीयास्मरणसंभवे तदप्रवेशादुपेक्षान्यत्वाप्रवेशात् न च स्मृतिं प्रति वैच्छेदनैत्येव तत्त्वेन हेतुत्वम
स्ति। संस्कारं प्रति वस्तुमात्रस्य रूपे [illegible] तदस्मिति वाच्यं। तथा सति उपेक्षास्थले संस्कारत्वेन
[illegible] कस्य [illegible] अनागोरवात्॥ न चैवं तुल्यन्यायतया संस्कारानुत्पत्त्यैव संशयात् स्मरणस्य [illegible] तीति
संभवे स्मृतिजनकतायामपि निश्चयत्वाप्रवेश इति वाच्यं॥ अन्यं तो जनकत्वाव [illegible] संभ
वे तिरस्कार [illegible] यारूपे या कीटप्रतात्यान्यापत्तात्॥ अन्यथाज्ञानत्वेनैव हेतुतास्तु संस्कारा भा
वादेव स्मरणाभाव इत्यस्यापि सुवचत्वात्॥ न चैवं तुल्यन्यायेन उपेक्षान्यत्वस्यापि प्रवेशो मास्त्विति वा
च्यं॥ उपेक्षात्वस्य तावच्छेदककूटरूपस्यासर्वविदुर्ज्ञेयत्वे तदन्यत्वस्य दुर्ज्ञेयत्वा [illegible]

नेदंत्वावच्छेदेन घटत्वप्रकारकसंस्कारं स्मृतिं च प्रति इदंत्वावच्छेदेन विरोधिसंबंधेन घटत्वाभा
वाप्रकारके इदंत्वावच्छिन्नघटत्वप्रकारकज्ञानरूपं निश्चयत्वं जनकतावच्छेदकं अत एव द्रव्यं घ
टो न वा अयं घट इति समूहालंबनसंग्रहः। घटो घटत्वाभाववांश्चेति समुच्चयस्यापि संग्रहः
संशयस्थले तु तद्रूपजनकताभावात् संस्कारस्य स्मृतेश्चानुत्पाद इति॥ यत्तु स्मृतिं प्रत्यु
क्तरूपेण हेतुता। संस्कारं प्रति तु इदंत्वावच्छेदेन घटत्वप्रकारकधीत्वेनैव हेतुता॥ अन्यथा अ
यं घटो न वेति संशयानंतरं केवलधर्मिस्मरणानुपपत्तिः तथा च संशयस्थले इदंत्वावच्छेदेन
घटत्वप्रकारकसंस्कारसत्त्वात् तथा स्मृतिवारणाय तज्जनकतायां निश्चयत्वं निवेश्यत इति तन्न।
धर्मिस्मरणान्यथानुपपत्त्या धर्मितावच्छेदकप्रकारेण धर्मिविषयत्वेनापि संस्कारस्य धर्
मितावच्छेदकावच्छेदेन घटत्वप्रकारकत्वकल्पने मानाभावात्॥ अन्यथा संस्कारं प्रति निश्च
यत्वेन हेतुतायां स्मृतौ तु ज्ञानत्वेनैव किं न स्यात्। अथ धर्मितावच्छेदकप्रकारकसंस्कारं प्र
ति अथ धर्मितावच्छेदकप्रकारकज्ञानत्वेन पृथगेव हेतुतायाः सर्वसंमतत्वेनैव धर्मिस्म
रणोपपादनात्॥ नन्वेवमयं घटो न वेति संशयात् किं वा धर्मिण इव केवलघटस्या
पि स्मरणापत्तिः। तत्रापि धर्मितावच्छेदकमिश्रितघट इत्येवमाकारकज्ञानानुरोधेन
घटत्वप्रकारकज्ञानत्वेन पृथगेव हेतुतायाश्चावश्यं वाच्यत्वादिति वाच्यं॥ इष्टत्वात्।

दपि संस्कारस्य सविषयत्वे मानाभावः ।। स्मृतित्वेन संस्कारत्वेनैव कार्यकारणभावात् ।। स्यादेत
दे एवं सत्यनातिप्रसंगः इदंत्वावच्छेदेन घटत्वप्रकारकस्मृतिं प्रति इदंत्वावच्छेदेन घटत्वाभावप्रका
रकत्वावच्छिन्नघटत्वप्रकारकज्ञानत्वेन संस्कारद्वारा हेतुत्वाच्चेनातिप्रसंगः ।। व्यापारव्यापारिणो
रेकमेव जन्यतावच्छेदकं इत्यत्र मानाभावात् ।। केवलं घटत्वादिप्रकारकस्मृतिं प्रति घटत्वप्रकारक
ज्ञानत्वेन हेतुत्वं न तु तत्र निश्चयत्वस्यापि प्रवेशः इत्थमपि संस्कारत्वावच्छिन्नं प्रति ज्ञानत्वेन सप्रका
रकजन्यज्ञानत्वेनैव वा हेतुत्वात् ।। उपेक्षात्म्याहे सत्ये वतत्त्व्य ज्ञानत्वेन हेतुत्वस्योभयमतसि
१०।। द्धमेव । न च ज्ञानत्वेन स्मृतित्वेनैव कार्यकारणभावोऽस्तु संस्कारस्येदंत्वावच्छेदेनेत्यत्तात्पर्य २१०।।
हेतुत्वाच्चेनातिप्रसंग इत्येवं किं न स्यादिति वाच्यं संस्कारस्य सविषयत्वासिद्धेः ज्ञाने सविषय
त्वस्यानुव्यवसायेनैव ग्रहादिति तदपि न साधीयः । घटपटसमूहालंबनस्य घटांशे २०।।
चोपेक्षात्मकस्य पटांशे उपेक्षात्मकस्य घटांशे उपेक्षात्मकस्य स्वजन्यसंस्कारसंबंधेन सत्वा
त् ।। पटस्मरणापत्तेः न च तत्रोद्बोधकाभावादस्मरणं यस्य पुरुषस्य घटपटसंस्कारा
नंतरं पटसदृशनिलक्षणवस्तुज्ञानांतरमेवावश्यं घटस्मृतिस्तत्र तस्य पुरुषीय पटस्मृ
१२३।। तिं प्रति तादृशवस्तुज्ञानत्वेन हेतुत्वेनोद्बोधकाभावस्यासंभवात् ।। एवमेकस्मि ।।२२।।

न्नेव घटे द्रव्यत्वघटत्वोभयप्रकारकज्ञानात्॥ पटत्वांशे उपेक्षात्मकात् द्रव्यत्वांशे उपेक्षात्मकात्॥ द्रव्यत्वप्र
कारकस्मृत्यापत्तिवारणाय संस्कारस्य सप्रकारतापि कल्पनीयेति॥ एवं नोक्तस्यातिप्रसंगवारणाय
संस्कारस्य तत्प्रकारतत्॥ धविशेष्यादिघटितरूपेण जनकत्वस्यावश्यकत्वे ज्ञानस्य ज्ञानत्वेन स्मृ
तित्वेनैव कार्यकारणभावः कल्प्यते न तु विशेषरूपेणापि प्रयोजनाभावादिति युक्तः पथाः॥ तथा
च स्मृतिजनकत्वं सहृदिति॥ असहृदनुभवे च एकसंस्कारनाशेपि संस्कारांतरं संभवतीति भावः॥
ननु संस्कारस्य फलनाश्यत्वे प्रथमस्मरणेनैव समूहालंबनसंस्कारस्य नाशादुत्तरं तद्विषयांतर
स्मरणानुपपत्तिरत आह॥ समानाकारस्येति घटत्वप्रकारकसंस्कारं प्रति पटत्वप्रकारक
स्मृतित्वेन नाशकत्वकल्पनाभावात्। घटत्वप्रकारकस्मृतिस्मृतिसत्त्वेपि पटत्वप्रकारकस्मृत्यभावा
न्न तदुभयप्रकारकसंस्कारस्य नाश इत्यर्थः॥ अत्र च स्मृतिजन्यसंस्कारस्य [illegible]व्यापत्ति
वारणाय यत्तत्स्मृतिजनकत्वं तत्तत्स्मृतिनाश्यताया प्रसक्तिरिति ध्येयं॥ समूहालंबनादौ
दिनादिकं [illegible]यमि विशेष्यकानेकप्रकारकज्ञानसंग्रहः ननु यत्र क्रमिकस्मरणं न तु समूहालंबना
त्मकं तत्र [illegible]संस्कारस्यानाशापत्त्या कालादेरेव नाशकत्वं कल्प्यं तथा च फलस्य नाशकत्वे व्यभि
चारः॥ तत्तद्व्यक्तित्वेन नाशकत्वप्रकल्पने च सहृदनुभूतस्थलेपि चरममफलमेव नाशकम
स्तु॥ वस्तुतस्तु॥ कालादेरेव तत्तद्व्यक्तित्वेन नाशकत्वमन्यगतिकत्वात्॥ स्मृतौ तु संस्कारनाश

॥तावच्छेदकत्वेनैका जातिरेव चरमफलमात्रवृत्तिः स्मृतित्वव्याप्या कल्प्यते। तथा च उपधा यक
तासंबंधेन विजातीयस्मृतिविशिष्टसंस्कारनाशं प्रति विजातीयस्मृतित्वेन हेतुता। अत एव विजा
तीयस्मृतिजन्यसंस्कारस्य कालांतरे विजातीयस्मृत्युपधायकस्यापि न क्षणिकता तदा
नीतस्य तदुपधायकत्वाभावेन तद्विशिष्टत्वाभावात्॥ अत एव ज्ञाननाश्यतायां तत्स्मृतेर्जनकत्वमपि
न प्रसासक्तिः॥ उक्तरूपेण नतिप्रसक्तत्वादित्याह॥ जायते चेति॥ अस्त्विति सदृशेति स्मरणादिनाका
शि०॥ र्यानुमितो दृष्टत्वं नाम संस्कारवृत्तिः॥ जातिविशेषः तवच्छिन्ने वान्वयव्यतिरेकाभ्यां पु नः स्म
र्यानुमितो दृष्टत्वं नाम संस्कारद्वारा इतरत्र साक्षादेव तत एव भावनाथाः प्रकृतरभा टी०॥
रध्यामेवकारणं तत्र पूर्वपूर्वस्मरणसंस्कारद्वारा इतरत्र साक्षादेव तत एव भावनाथाः प्रकृतरभा
रध्यामेवकारणं तत्र पूर्वपूर्वस्मरणसंस्कारद्वारा इतरत्र साक्षादेवातएवभावनाथाः प्रकृतरभा
र ध्यामेवकारणं तत्र पूर्वपूर्वस्मरण संस्कार इ
वनोजनकत्वमेनिरभाव्यकृतः नवकस्यचित् स्मृतिद्वयेन कस्यचित् स्मृतित्रयेन दृढतरसंस्कार इ
ष्यनेनुममः॥ तत्र पुरुषीयता हृदासंस्कारं प्रति तत्तत्स्मृतीनामपि तत्त्वेन हेतुत्वकल्पनादिति स्मृतिनिष्ठ भ०॥
जातिविशेष एव तादृशसंस्कारजनकतावच्छेदक इत्यपि कश्चित् न त्वेकस्यैव संस्कारस्य पुनः पुनः स्मृति
जननानंतरं सदृशदोषकसमवधानमेव दार्ढ्यं तावतैव सदृशेति स्मरणादिसंभवात्॥ तथा च
जननानंतरं सदृशदोधकसमवधानमेव दार्ढ्यं तावतैव सदृशेति स्मरणादिसंभवात्॥ तथा च
जननानंतरं सदृशदोधकसमवधानमेव दार्ढ्यं तावतैव सदृशेति स्मरणादिसंभवात्॥ तथा च
जननानंतरं सदृशदोधकसमवधानमेव दार्ढ्यं तावतैव सदृशेति स्मरणादिसंभवात्॥ तथा च
जननानंतरं सदृशदोधकसमवधानमेव दार्ढ्यं तावतैव सदृशेति स्मरणादिसंभवात्॥ तथा च

रकत्वात्संदिग्धव्यभिचारकं सामान्यरूपं ॥ अत एव विशेषणधीजन्यतावच्छेदकं विशिष्टानुभव
त्वे मिथ्याध्याथाः नैवायमपसिद्धांत इत्येके ॥ अभिहितं चेति ॥ तत्र पूर्वपूर्वस्मृतिसहितां सर्वथानु
भवपूर्वपूर्वप्रत्यक्षे हेतुरस्त्वियमस्त्वप्येपस्मृतीनामिथ्यादिसंभवधाने फक्किकार्थः ॥ स्वकीयोऽर्थः संस्कार
तत्कृतोयो विरोधो विनाशस्तद्वतीनामित्यर्थः ॥ अनुभवपरत्वादिति ॥ किंचित्तु ॥ यत्र एकस्मिन्नेव घटे अयं
घट इति प्रत्यक्षानंतरं द्वित्वसादि विलंबेन नायं घट इत्यनुभवपरत्वादिति ॥ किंचित्तु ॥ यत्र एकस्मि
न्नेव घटे अयं घट इति प्रत्यक्षानंतरं द्वित्वसानंतरं द्वित्वसादिति ॥ मिथ्यादिकमुत्पन्नं तत्र तादृशसंस्का
रं स्मृतित्व अति निश्चयत्वेन हेतुत्वे विचक्षणेऽपि तादृशानिश्चयद्वयजनितसंस्कारद्वयसत्वात् ॥
संशयात्मकस्मृत्यापत्तिरतस्तथाविधस्मृतिसामग्र्याः एवं तादृशघटत्वाभाववत्प्रकारकस्मृतिं प्रति
वा तादृशघटत्वप्रकारकस्मृतिसामग्र्याः ॥ प्रतिबंधकत्वमवश्यं वाच्यं ॥ तथा च स्मृतिजनकता
यां निश्चयत्वाप्रवेशेऽपि न क्षतिः न च तत्रानुमित्यादिना पूर्वसंस्कारो नाश्यते । अनुमित्यादेस्तादृ
शप्रत्यक्षाविरोधित्वेन तज्जनितसंस्कारानाशकत्वादिति वाच्यं ॥ साक्षात्जन्यत्वं स्वाव्यवहितप्रा
क्कालवृत्तित्व प्रत्यासत्त्या तादृशपरामर्शजन्यत्वं तेन विशेषणज्ञानतया सिद्ध्यादिकालीनेन प
रामर्शजन्येन धर्म्यंतरेव तद्व्याप्यवत्त्वादि अप्रत्यक्षेण जनितायामनुमितौ नाव्याप्तिः ॥ कस्याश्चित् ॥

स्मृतेः स्वाव्यवहित आकालच्छ इति परामर्शजन्यत्वस्य संभवेपि तत्र संस्कार एव अव्यासक्तिर्न तु तादृश आ
कालच्छ इति वेमितिनाति प्रसंगः॥ अत्रानुभवत्वापेक्षया गौरवमेवास्वरसः प्रकारांतरेणापि स्मरणानि
व्याप्तिकारणं दर्शयति॥ किंचेति॥ तदुभयविशिष्टेति व्याप्ति प्रकारेण धूमे पर्वतनिरूपिताधेयतायाः
पर्वतनिरूपिताधेयतायाः पर्वतत्वरूपेण व्याप्यनिरूपितपर्वताधिकरणतायां वा अवगाहित्वं वाच्यं॥
तेन प्रमेयमिति ज्ञानस्य व्याप्ये पर्वत इत्यादेश्च वारणं आधाराधेययोश्च समानसंवित्संवेद्यत्वा
टि०॥ द्दोषः व्याप्तिप्रकारेण धूमे पर्वताधेयत्वावगाहित्वस्य पर्वतत्वसत्वादेश्च वररूपेण पर्वते वह्निव्या
प्यं धारणावगाहित्वस्य चान्यतरत्वमेव हेतुतावच्छेदकं॥ लक्षणघटकमपीति॥ अन्यथा असंभवा टी०॥
पातात्॥ तद्द्वैवैशिष्ट्यावगाहित्वावच्छिन्नहेतुत्वमेव न तु स्मृतित्वव्यतारूपेण कुतो न हेतुता अत आ
ह॥ एकतरेति पर्वते वह्निव्याप्य इति ज्ञानात् पर्वतो वह्निव्याप्यवानिति स्मरणाभावादित्यर्थः अन्य
था अनुमिताविव स्मृतावपि उभयवैशिष्ट्यावगाहित्वेनैव हेतुत्वे॥ अनियमेन विशेष्यनियामक भ०॥
कार्यकारणभावरूपनियमविरहेण एकविशेष्यकस्मृतिसामग्र्या अपवान्यविशेष्यस्मृतिं प्रति
सामग्र्याका॥ नियमेन नियमतउभयविशेष्यकताप्रयोजके तिवा अर्थः ननु तत्प्रकारकतद्विशेष्य ॥२५॥
॥२५॥ क स्मृतिं प्रति तत्॥ प्रकारकतद्विशेष्यकधीत्वेन हेतुत्वं अत एव स्मृते तेनाऽपि यविशेष्यकत्वापत्तिरिति॥

कुत्र भ्रमयवैशिष्ट्यावगाहित्वेनापि समानप्रकारकत्वे हेतुतावच्छेदकत्वाद्यैशिष्ट्ये [illegible] तदंशे समानप्रका
रकत्वेनेति। तथा च तादृशसामान्येऽहेतुतयैव यत्र विशेषयोरिति व्याप्तेः [illegible] तत्र [illegible] स्यासिव्या
[illegible] यवैशिष्ट्यावगाहित्वेन हेतुत्वमिति भावः। केचित्तु [illegible] यकतर विशेष्यांशे तद्व्यतरस्य [illegible] तत्ता
त्मानप्रकारकत्वेन स्मरणयोः कार्यकारणभावभंग इत्याशयेनाह स्मरणमात्रकारकत्वेन
[illegible] भावकृत। तत्र स्मृतौ विशेष्येवतत्प्रकारकत्वं [illegible] व्यकत्वादिनैव तत्प्रकार [illegible] ज्ञान
[illegible] तदुभयवैशिष्ट्यावगाहित्वेन [illegible] पूर्ववदुभयवैशिष्ट्याव [illegible] हित्वेन हेतुत्वे
[illegible] सयेव निमत्र [illegible] तिनातिव्याप्तिशंकापीत्यनेन [illegible] यः। तत्र हेतुमात्रगतये तदादृश [illegible]
वच्छिन्नमपि विशिष्टवैशिष्ट्यवैशिष्ट्य वैशिष्ट्यवे [illegible] [illegible] वा माधानिरादि [illegible] [illegible]
जिन्य शाब्दबोधप [illegible] हेतुतामते [illegible] नेन [illegible] स्वर स [illegible] स्रा [illegible] हेतु [illegible] सर्थः
[illegible] तेन वह्निव्याप्य [illegible] भवस्य पर्वतो वह्निव्याप्य [illegible] स्मृति समान [illegible] विषयत्व
[illegible] तत्स्तदुत्पत्ति संभवनया [illegible] तिव्याप्ति शंका [illegible] स्यात [illegible] वह्निव्याप्यभाववत्व [illegible] काभावप्र
तियोगिधूमवान् पर्वत इत्यनुभवस्य वह्निव्याप्य [illegible] इति स्मृति विभिन्न विषयकत

तत्र हेतुमत्येतस्यांतासंभवित्वेन स्मृतौ तेन रूपेण हेतुत्वस्यासंभवादिति व्याप्ति शंकास्य दमथि
नेतिमिति भावः ॥ अत एव तु क्रमरूपेणाहेतुत्वस्य लक्षणे निवेशादेव व्याप्यत्वात् पक्षादीय
दिनापक्षविशिष्टव्याप्यस्य परिग्रहः ॥ व्याप्य विशेष [illegible] वपरामर्शस्य हेतुतावच्छेदिन
येषपतेः व [illegible] व्याप्य इति ज्ञानत्वेनैव हेतुत्वादित्यर्थः ॥ [illegible] भेतिविशिष्टवैशिष्ट्य [illegible] सावच्छि
श्री०॥ नं प्रति विशेषणतावच्छेदकप्रकारकनिश्चयत्वेनन हेतुत्वं दिति भावः ॥ येषं म [illegible] विशिष्टवैशिष्ट्य श्री०
बोधतावच्छिन्नं प्रति विशेषणतावच्छेदकतन्मतेप्यभाव अत्यक्षेति योगितावच्छेदकप्रकारकप्रति
योगि निश्चयत्वेन हेतुत्वकाव्यातथा च तदा दायता दृशाभाव प्रसत्यैव्याति [illegible] या मे ॥ स्यत्त्वापि
प्रकृत विकल्पयोन संभवतीति भावः ॥ हेतुत्वेपीत्यादि [illegible] रोऽस्वरसः सूचनाय [illegible] तदभावेऽतु प्र श्री०॥
तियोगिधियो अन्यतयाऽभाव प्रसक्त्वमवच्छेदक इत्यादिना तत्र प्रसक्तोऽभिधानात् ॥ ना
पि प्रतियोगितासंबंधेन सप्रकारकाभाव [illegible] तथापि घटाभावत्वेन घटाभाव [illegible] घट
प्रकारकधियोव्याभिचारात् ॥ नापि घटत्वरूपेण प्रतियोगिसंबंधेन [illegible] भावप्र [illegible] सुक्तं
॥२६ [illegible] मानाभावात् ॥ [illegible] प्रतियोगि [illegible] नो भाव [illegible] अभावत्वावच्छेदेन २६
[illegible] पक्षी [illegible] इत्याकारकप्रत्यय [illegible] संग: तथा च [illegible] दि [illegible] यस

वे [illegible] विशेषयत्तायावच्छेदक वैशिष्ट्यावगाहिभावप्रकारकअसंसर्गाग्रहादिकं इदंत्वे [illegible] नाभात प्र
त्यक्षादेशमेव इदंत्वप्रकारकाभावप्रत्यक्षत्वेन नानैवकारतिवच्छेदकं [illegible] अतएव विशेष्य
विशेषणभिन्नतिन्यायेनापि नाभावधीः अतएव विशिष्टवैशिष्ट्यबोधमा मयेति [illegible] रेव
तदुपपत्तेः न पृथक्कार्यकारणभावकल्पने तिष्ठेयम् [illegible] पारतावच्छेदकत्वे [illegible] मान
संविन्नासंवेद्यसेमानाभावः तादृशान्यतरत्वं गौरवात् [illegible] दर्शनकतावच्छेदकता [illegible]
व्याप्यवान् [illegible] वृत्ति पर्वतेव [illegible] व्याप्य इति ज्ञानयोः [illegible] हेतुतावच्छे [illegible]
तथाचाति प्रसंगस्तदवस्थ एव स्यात आह साध्य [illegible] विषयत्वे [illegible] ति [illegible] [illegible]
विषयकत्व [illegible] वेलक्षण्ये नाजन्यत्व विशिष्ट [illegible] [illegible] विशेषणशि [illegible] [illegible]
वच्छेदकायने [illegible] पेक्षणि [illegible] विशेषणाज्ञानस्यैव विशेषणतावच्छेद [illegible] [illegible]
रकत्व सत्वात् [illegible] विशिष्टवैशिष्ट्य [illegible] घतात् [illegible] ति विशेषणज्ञानस्यावव [illegible]
पूर्ववर्त्तित्वमित्यर्थः विशेषणधियः [illegible] तस्य [illegible] [illegible] तत्त्व [illegible] यस्य क [illegible]

देसग्रेतनेनान्वयः संबंधभेदेन कारणताभेदान्नैकं हेतुत्वं संस्कारस्यव्याप्यतापिन संभवति संस्कारमजन
यित्वापि विशेषणज्ञानेन विशिष्टज्ञानजननादित्याह॥ निर्वि[illegible]ताकस्येति तथाच संवेत्त्रैव विशेषणाधियः॥
साधं हेतुत्वमिति भावः॥ ननु समानप्रकारकसमानविशेष्यकत्वेनैव[illegible] तं प्रतिकारणत्वं ज्ञानस्यकुतं नि
सि॰॥ विकल्पकस्मृतिं प्रतिकारणांतरस्य कार्यतावच्छेदकांतरस्य च कल्पने गौरवात् इत्यत आह॥ नन्वेवं घटत्वांशेऽन्यप्रका
रक घटत्वविषयक[illegible]तं प्रतिताद्रूप्यघटत्वधीत्वेन संबंधविध्यासम[illegible] धीत्वेन [illegible]ट विषयक स्मृतिं टी॰॥
प्रतिताद्रूप्यघटत्व[illegible]हेतुत्वंच कार्यकारणभावकल्पनात् घटत्वप्रकार[illegible] च [illegible] विशेष्यकस्मृतित्वं न कार्यता
वच्छेदकमतो निर्विकल्पकात्मकस्मरणेनानुपपन्नमितिवाच्यं॥ एकस्य घटस्य घटत्वेन घटांतरस्य च द्र
व्यत्वेनैव ग्रहे घटांतरविशेष्यकघटत्वप्रकारकस्मरणापत्तेरित्याह॥ क[illegible]मिति॥ तथाच विशिष्ट
वैशिष्ट्यानुभवत्वं तज्जन्यतावच्छेदकमिति न स्मृतौ व्यभिचार इति भावः॥ न स्या[illegible]रोपणाधियः॥ न यम मू॰॥
नो विषयस्मृतेरिति अपेक्षानुद्बुद्धसंस्कारज्ञानेन इच्छादिकं न जन्यत इत्या[illegible]र्थः॥ साध्या[illegible]रिस्यादिना
पक्षहेतुहेतुतावच्छेदकसंबंधसाध्यतावच्छेदकसंबंधपरिग्रहः॥ दे[illegible]दे [illegible] वह्निव्याप्या
॥१२॥ नुमितौ धूमवान् वह्निव्याप्यवान् वह्निव्याप्यवांश्च पर्वत इत्याकार[illegible]परामर्शात् जायतां पर्वतो व ॥१२॥
ह्नि[illegible]वान्व[illegible]ह्निमांश्चेत्यनुमिता विन्यस्तेति तस्यां व्याप्त्यप्रका[illegible]तो निश्चये अन्यायां

साऽव्याप्तिरपि अनुभवत्वव्याप्यत्वं तन्नून इतित्वं ॥ तत्रानुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वं ॥ एवं
अनुभवत्वव्याप्यजातित्वं मत्वविवक्षणे ॥ अनुभवत्वव्याप्यत्व प्रवेशापेक्षया लाघवार्थमाह ॥ पर्वतो व
ह्नीति प्रागुक्तयुक्त्याऽनुभयवैशिष्ट्यानुगाहित्वस्य कारणतानवच्छेदकतादाह ॥ वह्निव्याप्यवत् । पर्व
तेति ॥ प्रतियोगिकोतं वृत्यं तत्त्वकार्यतायां विशेषणं ॥ अवच्छेदकत्वं ॥ अवच्छेदकताश्रयत्वं न त्ववच्छे
दकत्वं पर्याप्त्यधिकरणत्वं अवच्छेदकताश्रयश्च तादृशविशिष्टशरीरघटकपदार्थ एव तथा च
पर्वतविशेष्यकं वह्निप्रकारकानुमितित्वस्यावच्छेदकत्वेव वह्नित्वादेरपि तद्घटकतया तद्वृ
त्तिव्याप्तिरतो ज्ञानवृत्तिरिति ज्ञानसमवेतस्यार्थः ॥ आलोकादिलिंगकानुमितिव्यावृत्तस्य वह्नि
व्याप्यधूमवान्पर्वत इत्याकारकतादृशपरामर्शाव्यवहितोत्तरतादृशावेद्यानुमितित्वस्य कार्यता
वच्छेदकत्वेवं घटघटकज्ञानमात्रेऽतिव्याप्तेराह ॥ सामानाधिकरण्येनेति ॥ ज्ञानत्वस्य कार्यतासा
मानाधिकरण्यसंबंधेनावच्छेदकत्वं किंत्वव्यवहितोत्तरत्वपरित्वायकपरामर्शघटकतया
अनुमितित्वस्यैव तादृशसंबंधेनेवावच्छेदकत्वं तादृशानुमितिः ॥ कार्यतेति कार्यताग्रहे सामाना
धिकरण्येनैव तस्यावच्छेदकत्वावगाहिनादिति भावः ॥ व्याप्यविषयकेत्यत्रापि खंडशो व ततया
नेय्यव्यापिका वेपितदपेक्षालाघवायाह ॥ व्याप्तिभान इति । व्याप्तिभानेऽवश्यंभासमानं साध्यम

पीतित्वद्विषयकत्वोपादाने उ संभव इत्यस्तादृशानुमित्यविषय इति तत्व्याप्ति परामर्शाधीनानुमितिवि
षयोपध्यादिस्तादृशविषयकत्वं वाच्यमित्यर्थः॥ ननु पर्वतो वह्निमानित्यनुमितित्वावच्छिन्नं प्रति पर्वतो व
ह्निव्याप्यधूमवानिति परामर्शत्वेन न जनकता वह्निव्याप्येत द्रुपवान् पर्वत इति ज्ञानजन्यत्वव्यभिचारा
शि०॥० त्॥ नापि वह्निव्याप्यधूमवान् पर्वत इति परामर्शीयव्याप्तिव्यवहितोत्तरतादृशानुमितित्वं तत्कार्यता
वच्छेदकं॥ अव्यवहितोत्तरत्वं हि तादृशपरामर्शाधिकरणकालध्वंसानधिकरणत्वं चेत्तर्हि तादृशपरा
मर्शध्वंसाधिकरणकालध्वंसाधिकरणत्वात्॥ अनादौ संसारे उनेकानामेव तादृशपरामर्शाणां टी०॥०
नाशात्॥ तत्परामर्शव्यक्तिध्वंसाधिकरणकालध्वंसाधिकरणत्वे॥ सति तत्परामर्शव्यक्तिध्वंसाधिक
रणकालध्वंसानधिकरणत्वरूपे उव्यवहितोत्तरत्वे कार्यतावच्छेदकस्य तत्तद्व्यक्तिमात्रविश्रान्ततया
तत्तद्व्यक्तित्वमेव तत्तद्व्यक्तित्वावच्छिन्नजन्यतावच्छेदकं मतः॥ परामर्शत्वस्यानुमितित्वस्य च अन०॥०
कार्यकारणतयोरवच्छेदकत्वे मानाभावः॥ न च तत्तद्व्यवहितोत्तरत्वसंबंधेन सामानाधिकर
ण्यविशेषितेन परामर्शत्वेनानुमितित्वमेव तथा॥ तादृशानेकपदार्थघटितव्यवहितोत्तर
त्वसंबंधत्वे मानाभावात्॥ न चैककालावच्छेदेनैकात्मवृत्तित्व प्रत्यासत्त्या परामर्शजन्यानुमि
॥७२॥ ति विशेषानुमितित्वं तथा क्षणद्वयात्मकस्यैककालोपाधेस्तयोः तेन विनश्यदवस्थपरामर्श ॥७२॥
जन्यानुमित्यसंग्रह इति वाच्यं॥ पुनरप्येकलिंगकत्वस्यानुमिति द्वितीयक्षणे तृतीयक्षणे वा

धूमपरामर्शोयादृतादृशानुमितौ व्यापितेनसंबंधेनधूमप्रकारकपक्षणवृत्तिपरामर्शाधिकरण
क्षणावृत्तिपरामर्शाधिकरणक्षणाद्यावच्छेदेनैकाभवृत्तित्वस्यचसंबंधत्वेमानाभाव इत्यस्वर
सान्मूलोक्तलक्षणमुपेक्ष्यलक्षणांतरमाहु॥ यांकोचिदिति॥ केचि न्तु यत्रविषयविशेषेपक्षे
नव्याप्येनैकव्यापकस्यानुमितिर्यस्तत्र तद्व्याप्यविशिष्टतादृशपक्षज्ञाने तेन तत्पक्षकतादृशविधूष्ट
यविशेषानुमितित्वेन कार्यकारणभावे बाधकाभावात्तदनुमितिमा दायजातिघटितं मूलोक्त
लक्षणमुनाकुमितिमाहुः॥ लिंगोपहितलैंगिकभानपक्षे वह्निव्याप्यधूमवान्पर्वत इति
परामर्शस्यवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितित्वमेवका र्यतावच्छेदकं आलोकवा
लोकेपरामर्शजन्यानुमितौनव्यभिचारः॥ तत्र वह्निव्याप्यालोकवान्पर्वतोवह्निमानित्येवानुमि
तेसत्वात्॥ लिंगानुपधानपक्षेतुपर्वतोवह्निमानित्यनुमितित्वेनकार्यतावह्निव्याप्यधूमवा
न्पर्वत इतिपरामर्शत्वेनजनकतावह्निमत्पर्वतस्यानुमितेर्धूमलिंगकतत्तदनुमिति
स्वरूपाविषयतेनकार्यतावच्छेदकः॥ संबंधः अ व्यवहितोत्तरत्वापक्षयालघुत्वात्तत्स्वरू
पस्यसंबंधत्वेन कुसत्ताख्यातौनालोकादिलिंगका नुमितौव्यभिचारः॥ एवंआलोकादिलिंगक
तावच्छेदकमितिकेचिन्तु॥ तन्न॥ क्वचिदेवपक्षेकिंचिदेवसाध्यंअनुमितिविषयोनापर इत्यत्रनि

यामकालमेव वह्निव्याप्यधूमवान् पर्वत इति परामर्शादपि घटानुमितिप्रसंगात्॥ नन्वघटानुमितौ घ
टपरामर्शः कारणं तादृशपरामर्शे घटस्यापि विषयत्वसंभवात् तदनुमितौ न व्याप्यवत्वे सज्ञानत्वे
न विशिष्य हेतुत्वकल्पनेन किं परामर्शत्वेन जात्या॥ नन्वानुमितित्वस्याकस्मिकतापत्तिः॥ ज्ञानत्वे
नैव तदवच्छिन्नं प्रति हेतुत्वस्य सुवचत्वादिति न व्यक्तीति॥ श्टंगग्राहिकयानुमितिव्यक्तिवि
शि० शेषग्रहः॥ समवेतान्तमन्यान्तमसमवेतान्तं च पृथगेव विशेषणं॥ एतच्छोभायैव धर्मपदं तत्र प्र टी०
मुक्तत्वादिवारणायाद्यं प्रत्यक्षत्वादेरपि कालिकादिसंबंधेनानुमितिवृत्तित्वात् समवेतेति॥ अ
नुभवत्ववारणाय द्वितीयं॥ अत्रानुभवत्वं तत्तद्व्यक्तित्वेनोपादाय तद्व्यक्तित्वावच्छिन्नप्रतियोगि
ताकोभेदः॥ अन्यथानुभवान्यासमवेतस्य कलानुभवे समवेतत्वरूपानुभवत्वत्वप्रविष्टस्य के भं०॥
वलानुभवे समवेतेतस्य वैयर्थ्यापाततावच्छिन्नप्रतियोगिताकभेदस्यैव विवक्षितत्वे सत्तादी
नामपि वारणेनुभवान्यासमवेतस्य वैयर्थ्यापातात्॥ ज्ञानत्वादिवारणाय तृतीयं विशेषणं
॥ मनुमितित्वस्यापि कालिकादिसंबंधेनानुभवान्यस्मिन् कालादौ वृत्तेरप्रसिद्धिरतोऽसमवे
तेति॥ तादृशधर्मस्यावतस्य कालादावप्रसक्तत्वात्॥ दोह॥ समवायित्वमिति॥ तथा च ॥८६

समवायसंबंधेन ता दृशधर्मत्वं लक्षणमिति भावः ॥ स्वर्गादिशाब्दबोधादौ स्वर्गादिकमनुभवामीत्यनुव्यवसा
याभावात् ॥ प्रत्यक्षं ज्ञानान्यानुभवत्वं स्मृतिव्यावृत्तो ऽनुभवव्यवहारस्य स्मरणान्यज्ञानत्वं निबंधनं इति
मतेनाह ॥ अनुभवत्वं जातीति तथा च निःप्रयोजनकतया ऽनुभवत्वान्येति विहाय स्मरणान्यज्ञानान्यासम
वेतत्वे गौरवात् ॥ स्मरणासमवेतत्वमेवोपादेयमिति भावः ॥ यद्यपि अनुभवत्वजात्यंगीकारे पि तद्व्यक्ति
समवेतं प्रत्यक्षासमवेतधर्मसमवायित्वं सुवचमेव तथापि प्रत्यक्षादिज्ञमिति चतुष्कस्यैव लक्षणमे
नेनोक्तं तद्व्यक्तिपदेन प्रत्यक्षमिति परिग्रहे प्रत्यक्षमिति रेवं शाब्दविशेषपरिग्रहे शाब्दस्याप्य
नेन लक्षणकथनसंभवादेवमुपमितावपीति भावः ॥ व्याप्तिज्ञानकारणं परामर्शो व्यापारः व्यापार
व्यापारिणोरेकमेव जन्यतावच्छेदकं तथैव व्यापारव्यापारिभावसंभवादिति मतानुसारेणाह ॥ व्याप्ति
ज्ञानत्वावच्छिन्नेति ॥ वह्निव्याप्यधूमवत्पर्वतवानिति विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नकार्यतावार
याय व्याप्तिज्ञानेति व्याप्तिज्ञानत्वावच्छिन्नायाः कारणतात्प्रतियोगिककार्यताया यदवच्छेदकं
तत्त्वं दर्शितमित्यर्थः ॥ व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिकप्रत्यक्षवृत्तिकार्यतावारणा
य विशिष्टपरामर्शत्वावच्छिन्नेत्यादि ॥ तत्र हि व्याप्तिज्ञानत्वावच्छिन्नस्य कार्यतावच्छेदकं व्याप्तिव्या

विशिष्टज्ञानत्वं परामर्शस्य तु तादृशपरामर्शाविशिष्टवैशिष्ट्यज्ञानत्वमिति नैकसुमयकार्यताव
च्छेदकमिति तद्वैशिष्ट्यस्य क्षौदौनातिव्याप्तिर्न च वह्निव्याप्तिज्ञानस्य तद्व्यवहितोत्तरवह्न्यनुमि
तित्वं वह्निव्याप्यधूमवान् पर्वत इति परामर्शस्य तद्व्यवहितोत्तरपर्वतविशेष्यकवह्न्यनु
मितित्वं कार्यतावच्छेदकमित्यत्रापि नैकावच्छेदकमिति वाच्यं वह्निव्याप्यधूमः वह्निव्या
प्यरूपधूमविशेष्यवान् पर्वत इति समूहालंबनात्मकव्याप्तिज्ञानव्यवहितोत्तरवह्न्यनुमि
तौ स्वजन्यपरामर्शसंबंधेन धूमीयव्याप्तिज्ञानस्य व्यभिचारितया कारणताभावेन
तज्जन्यतायामपि तादृशधूमपरामर्शाव्यवहितोत्तरतादृशवह्न्यनुमितित्वस्याव
च्छेदकत्वात्॥ यत्तु॥ व्याप्यज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकं वह्न्यनुमितित्वं तदवच्छि
न्नात् धूमवद्धर्म्यवच्छिन्नपर्वतविशेष्यकवह्न्यनुमितित्वस्य तादृशपरामर्शजन्यतावच्छेदकस्य वह्न्यनु
मितित्वघटितत्वादिति॥ तन्न॥ व्याप्तिविशिष्टवत्ताकृतिवैशिष्ट्यज्ञानत्वज्ञानत्वस्य तादृशपरामर्शज
न्यतावच्छेदकस्य व्याप्तिविशिष्टज्ञानत्वरूपतादृशावच्छेदकघटितत्वादतिव्याप्तिरिति॥ केचित्तु
स्वरसवीजं तु व्याप्तिशरीरघटकतावत्पदार्थानां स्मृतौ विशेष्यविशेषणमिति रीत्या यत्र परामर्शे
ऽस्ति तत्र व्यभिचाराद्व्याप्तिज्ञानत्वेन कारणत्वे वन॥ एवं अव्यवहितोत्तरत्वस्य तत्तद्व्यक्ति विश्रां

ततथाकार्यतानवच्छेदकत्वात् परामर्शविषयेन जनकतावच्छेदकमित्यादि॥ पक्षधर्मतेति पक्षत्वविशि
ष्टपक्षस्य धर्मताज्ञानमेव पक्षतायाः परंपरया विशेष्यं तदन्वयिनी जन्यतातत्र पक्षतायोरन्वयः॥ तात्प
र्यविशेषज्ञाने साक्षादुचितस्य धर्मत्वादेव विशेषणत्वेपि धर्मताविशेषण्या पक्षविशेषणीभूत पक्षता
याअपि विशेषणत्वेन जन्यतायामन्वयः लोहितोष्णीषा ऋत्विजः प्रचरंतीत्यादौ उष्णीषस्यापत्वादु
विवक्षितस्यापि यथा लोहित्यं विशेषणत्वेन इष्टसाधनतान्वयीति भावः॥ पक्षधर्मतेत्यत्र लक्षणवाक्ये
पक्षतासत्त्वे तत्त्वसंबंधेन प्रथमज्ञाने विशेषणमित्यपि कश्चित्॥ यथोक्तायाः॥ सिषाधयिषा
विरहविशिष्टसिद्ध्यभावरूपायाः कालाद्यतीन्द्रियपदार्थघटितत्वेन न प्रत्यक्षत्वमतो विशेष्येति वि
शेषणावति विशिष्टाभावस्य विशेष्याभावरूपत्वादेव विशेष्यवति विशिष्टाभावस्य विशेषणाभावरू
पत्वात् विशिष्टाभावस्यातिरिक्तत्वे यत्र विषये विशेषे सिसा॥ धयिषप्रयुक्तोनानुमित्युत्पाद
स्तत्र सिद्ध्यभावस्यैव पक्षतात्वात्॥ एवं यत्र सिद्धिकाले सिसाधयिषा अथ तत्रैवानुमितिस्तत्र सि
साधयिषायाएव पक्षतात्वात्॥ तस्याश्च प्रत्यक्षजनकत्वात् ज्ञातिव्याप्तिरिति परामर्शोपादान
मिति भावः॥ तत्वेन परामर्शत्वेन तद्धेनेत्यस्य फलमाह॥ बाधादीति॥ आदिना सत्प्रतिपक्षप
रिग्रहः॥ तश्चानुमिति सामग्र्यभावप्रदर्शनार्थादिवीत॥ त्वसाभग्रीन शीत॥ प्रतियोगी॥ ति

सिद्ध्यभावप्रतियोगिसिद्धविषयकत्वेस्यर्थः। अत्र च सिद्धित्वप्रकारकसिद्धिज्ञानत्वेनैव सिद्ध्यभावजन्यताव
च्छेदकं तस्मात् किंकत्रस्य पक्षत्वावच्छिन्नं जनकत्वं भिन्नादीनां संमतं तेनैकावच्छेदेनैत्यस्यापि सत्वं। सूचितं दु
कावच्छेदेनैत्यस्य फलमाह। तदुभयसमूहालंबने इति न च परामर्शप्रत्यक्षे पक्षसमवशत्विनेकारणताभावा
देकावच्छेदेनेति यथार्थमिति वाच्यं वह्निव्याप्यधूमवान्पर्वतो नास्ति सिद्ध्यभावश्चेति समूहालंबनेतात्पर्यात् ति
द्वि॰।। यदि च विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रतिविशेषणतावच्छेदकप्रकारकधीत्वेन न हेतुत्वं अभावोपनीत टी॰।।
भाने प्रसंगात् अपि प्रतियोगितावच्छेदकधीत्वेन हेतुत्वं तदा सुखव्याप्यदुःखवदात्माभिन्नमिदं सुखवानात्मे
ति सिद्ध्यभावश्चेति समूहालंबनेति व्याप्तिसिद्धं व्यातत्वेस्यु मिति चिंतावीजं तु परामर्शजन्यतावच्छेदकको
टौ तल्लिंगकत्वं विशिष्टपक्षे ता जन्यतावच्छेदककोटौ तन्निवेशेन मफलं यदि च विषयतासंबंधेनावच्छे
दकस्यैक्यं विवक्ष्यते तदानायं दोषः पर्वतो वह्निमानिति अनुमितित्वं सिद्ध्यभावस्य कार्यतावच्छेदकं भ॰।।
वह्निव्याप्यधूमवान्पर्वत इति परामर्शस्य कार्यतावच्छेदकसामानाधिकरण्येन सिद्धेरभा
वस्य कार्यतावच्छेदकं पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाह्यनुमितित्वं सामानाधिक
रण्येन परामर्शस्य तु पर्वतविशेष्यकवह्न्यनुमितित्वं पर्वतत्वावच्छेदेन वह्न्यनुमितिसा
श्री॥ धारणं पर्वतत्वावच्छेदेन वह्निव्याप्यपरामर्शस्यापि तत्सामानाधिकरण्यावगाहित्वेन व्य
भिचाराभावादिति वाच्यं अवच्छेदकावच्छिन्न सिद्ध्यभावसामानाधिकरण्यावगाहि परामर्शस्य ३५॥

रव प्रकृतानवेशात् एवं तत्त्वस्य सामानाधिकरण्येनैव व्याप्त्यनुमितित्वस्य तदुभयत्वेऽन्यतावच्छेदक-
त्वात्॥ अवच्छेदकतावच्छेदेनानुमितावपि सामानाधिकरण्यावगाहित्वस्य तदुभयत्वेऽन्यतावच्छेदक-
सत्वादिति दिक्॥ व्याप्तिज्ञानत्वं व्याप्तिप्रकारकज्ञानत्वं पक्षधर्मतांशे व्याप्तिप्रकारकत्वं च निश्चये
सत्वेन हेतुतायां व्याप्तिप्रकारकज्ञानत्वस्यापि निवेशात्॥ व्याप्तिज्ञानेत्वं व्याप्तिप्रकारकपक्षधर्मता-
निश्चयत्वमित्यर्थः। व्याप्तिप्रकारकज्ञानेत्वोदेश्यव्याप्तिप्रकारकघटितत्वात्तस्यैव तादात्म्येन ति
तत्व मुचितमित्याशयेनाह॥ तादात्म्येनेति॥ ननु व्याप्तेः सासाधनभेदेनाहे ननु गतत्वात्तव्या- त
प्तिज्ञानजन्यत्वविशिष्टतादृशजातिमत्कारणत्वस्य सकलव्याप्तिज्ञाननिष्ठत्वात् भागासिद्धिवारणा-
य कार्याधिकांश प्रयोजनं स्यादत आह व्याप्तेरिति। अधिकस्य तादृशजातिमत्कारणत्वस्य भागा-
सिद्धीति॥ तथा च व्याप्तिग्रहानौपयिकत्वेन सार्थकत्वमिति भावः॥ फलायोगव्यवच्छिन्नं
कारणमिति करणलक्षणाभिप्रायेणाह॥ फलोपहितस्येति। तथा च फलानुपहितेपि व्याप्तिज्ञाने
वर्तमानेन व्यभिचारात्॥ तद्वारणाय तादृशजातिमत्करणत्वं फलोपधानरूपं हेतुः कोटिमि-
ति भावः॥ अनुमितिस्वरूपयोग्यस्य लक्ष्यत्वेपि न क्षतिरिति अभिप्रायेणाह॥ करणत्वेति॥
तथा च यत्र ह्याय निरूपितव्याप्तिर्येन विशेषणेन विना न गृह्यते तत्तस्य सार्थकमिति न्या-

येन धर्मिधर्मिभेदान्नवैयर्थ्यमिति भावः॥ ज्ञानत्वतादीत्यादिना व्याप्तिज्ञानत्वपरिग्रहः॥ यद्यपि व्याप्ति
ज्ञानत्वमेव करणत्वं तस्य च व्याप्तिज्ञानत्वेनैव व्याप्तिग्रहसंभवस्तथापि व्याप्तिज्ञानानंतरस्य अनुगत
विशेषणं विना व्याप्यग्रहात्तस्य सार्थकत्वमिति भावः॥ स्वरूपसंबंधरूपकारणतावच्छिन्नत्वमि
त्येवेत्यपि वदंति॥ तादृशज्ञानत्वं परामर्शत्वं तस्य करणत्वाभावान्नकत्वान्न धर्मभेद इत्यन्ये स्वम
प्रागभाववद्धर्मिभेदेऽपि वैयर्थ्यमिति मतेनाह॥ व्यतिरेकीति॥ हेत्वभावनिरूपिता साध्याभावनि
ष्ठव्याप्तिग्रहितया हेतौ वैयर्थ्यशंकानेवकानवकाशादिभावः॥ नियमेनेति॥ यद्यप्यनियमेऽपि
सर्वेन स्वरूपसत्प्रत्यक्षोपजीवकं तथाप्यदृष्टद्वारा नियमाजन्यस्येव प्रत्यक्षोपजीवकत्वसंभव
टी०ग। ति॥ तत्तथोक्तं ज्ञानाकरणकेति॥ ज्ञानत्वावच्छिन्नकरणताकत्वाभावात्॥ ज्ञानत्वं ज्ञानकारणकत्व भ
टी०१९ व्यभिचार्येनुभवत्वव्याप्यजातिमत्त्वं वार्थः॥ अत्रानुमिनोमिन साक्षात्करोमीत्यनुव्यवसाय
३।२॥ बलादनुमितेः। प्रत्यक्षवैजात्यसिद्धेत करणस्यापि वैलक्षण्यं सर्वजनीयं॥ अतोऽनुमितावुक्त
लक्षणातिव्याप्तिफलवैजात्याधीनप्रमाणांतरकल्पनस्य नापवादिकेत्यस्वरसांकस्त्वदित्य २३
नेन दर्शितं॥ सिध्यसिद्धिव्याघातादाह॥ अनुमानत्वेनेति॥ मुख्यार्थपरत्वेनाप्यनुमानपदं
संगमयति॥ असदिति॥ तन्मात्पदानामलौकिकत्वादरतेरनुगताकारमात्रस्येवालौकिकत्वादि

न्नप्रमाणान्तरविषयस्वलक्षणविषयकत्वेऽप्यसंवादो न संभावनायामतीकृत्व षयिष्यामस्तआह॥
संवादे॥ यथाश्रुतस्यागोबीजमाह॥ संभावितस्येति॥ असत्त्वे हेतुरननुगताकारस्येति॥ परमार्थसन्न
न्तः स्वलक्षणाः॥ सामान्यमात्रविषयकेनेत्यर्थः॥ स्वमसाधारणमनेकदेशकालानुवृत्तिस्वात्मकं तद्दे
व लक्षणं व्यावर्त्तकं यस्य तन्मते तेन धर्मधर्मिभावस्यानभ्युपगमात्॥ एतेनानुगतधर्मसंबन्धा
भावात्॥ कथं तस्य परमार्थसत्त्वमिति शंकानिराकृता॥ नन्वेतन्मते नैतत्संवादलक्षणं॥ पूर्वापराध्य
ध्ययोरैकस्वलक्षणाविषयकत्वात् जगतः क्षणभंगित्वात्॥ किंच निरुक्तसंवादस्य परमार्थ
सद्विषयघटितमूर्त्तिकस्य विकल्पेनासंस्पर्शात्॥ कथं भ्रमोपीति सत एतन्मतसिद्धं संवादमेवोपपादय
ति॥ अध्यक्षमूलकेति॥ शाब्दविषयादिविकल्पनामानादिवासनापरिपाकमात्रमूलकानां वारणा
य॥ मे अध्यक्षमूलकेति॥ अत्र संभावितस्येत्यनुषज्यते तथा च संभावितस्यार्थस्य मूलकविकल्पोल्लि
खितत्वात्॥ संभावनायामध्यक्षमूलकविकल्पोल्लिखितविषयकत्वं संवाद इत्यर्थान्निर्वचनस्यानुपप
त्तिः॥ संभवनमेव शाब्दादेः प्रवृत्तिः स्यादत उक्तं निर्णयेति॥ आदिना आकांक्षातात्पर्यादिनिर्णय
परिग्रहः॥ न प्रत्यक्षं प्रमाणमितीति॥ तथा च अभिमतस्य प्रत्यक्षातिरिक्तप्रमाणाभावव्य
वस्थापनस्यापह्नुतत्वान्नैवानुमानाप्रामाण्यसाधनं चार्वाकस्येति भावः॥ अप्रमाणसा

न्यस्य प्रमाणेपि सत्वात् अप्रमाणसाधर्म्येविनैनाप्रामाण्याभावव्याप्यत्वे स्यत आह॥ अप्रमाणितेति॥ अप्रमाणता
प्रयोजक स्मिंहि यत्संव्याप्तिनिश्चय यत्रादिवैकतरसिद्धं तथाच पूर्वव्यभिचारशंकोपवर्णनं व्याप्तिनिश्च
याभावप्रदर्शनद्वारा अप्रमाणताप्रयोजकरूपशून्यत्वसंपादनायैवेति भाव॥ दृष्टंसाधनवत्तया
निश्चितं॥ तस्य साधर्म्यं साध्यव्याप्यहेतुस्वरूपं तस्य दृष्टं ज्ञायमानं प्रतीतत्वस्याविशेषणात् तथाच
ज्ञायमानसाधर्म्यस्येतिवार्थः॥ ज्ञानेकारणतापक्षमात्रिमुद्रयति साधर्म्यदर्शनस्यवेति॥ अभिहि
तमेवेतिव्यवहारहेतुरित्यंतेनान्वितं॥ तथाचानुमानाप्रामाण्यं परकीयसंदेहादिकंच साधर्म्यद
र्शनेन संभाव्य तत्तद्व्यवहारोपपत्तिरित्यर्थः॥ केचित्तु॥ अभिहितमेव साधर्म्यदर्श २०॥
सि॰ नं अप्रमाणताप्रयोजकरूपशून्यत्वदर्शनं संभावनामनुमाने अप्रमाण्यसंभावनां भावयति जने
यतिनन्तु संभावनया कथमप्रामाण्यव्यवहारः॥ कथंचापरकीयसंदेहदिकमनिर्णीयतत्तुच्छेदा
यशब्दप्रयोग इत्यत आह॥ संभावनेवेति॥ तथाच परकीयसंदेहादिकं संभाव्यैवतादृशः शब्द २१॥
प्रयोग इत्यर्थयाचकुः॥ आपाततइति॥ यावदसत्ख्यातिर्न व्यवस्थाप्यत इत्यर्थः॥ तत्सिद्धौतु भ्रम
स्यासत्ख्यातिरूपतयाभ्रमजनकत्वसिद्धावपि नाप्रामाण्याभावसिद्धिरिति भावः॥ विषयबाधेति॥ २२॥
२३॥ अप्रामाण्याभाववति अप्रामाण्यप्रकारकत्वरूपभ्रमत्वस्य विशेष्ये अप्रामाण्याभाववत्तांविना

अनुपपत्तेरिति भावः ॥ संशयेऽप्यालिंगजतत्प्रकारकत्वात्मकरजतत्वप्रमाभ्रमसाधारणधर्मदर्शनात्
विशेषादर्शनाच्च भवति अतस्तौ तत्र संभवतीत्याह ॥ अनुभवगतासंस्पर्शनीत्यादिना ॥ अनेन साधार
णधर्मवद्धर्मिज्ञाननिरासः ॥ परमार्थसदित्यनेन विशेषादर्शनस्य निरासः ॥ तादृशस्वलक्षणविषयक
त्वस्यैव असत्ख्यातिव्यावर्तकधर्मविधयासंशयविरोधित्वादिति कोटिरूपविशेषनिश्चयमपि दर्शयि
ति ॥ स्वसंवेदनेति ॥ स्वस्य स्वात्मकेन संवेदनेन संवेदितं विषयीकृतं प्रामाण्यं यस्येति ॥ सविकल्पके सं
शयकारणोपपत्तिमाह ॥ परं त्विति ॥ प्रत्यक्षे अप्रामाण्यशंकाविरहे कथमिंद्रियार्थसंनिकर्षानं
तरमुत्पन्ने ज्ञाने ऽप्रामाण्यसंशयानुभव इत्यत आह ॥ तदुत्तरभाविनीति ॥ समुल्लिखितो विषयी
कृतो अलीकोनुगताकारो येन तत्त्रासन्मात्रेति ॥ असदविषयकत्वे सविषयकत्वं सन्मात्रावलंबनत्वं
तज्ज्ञानि विकल्पविषयः ॥ असदृष्टितमूर्तिकत्वाद्विषयितायाश्चैनवस्थापाताच्च ॥ न च तदपि संभाव
नीयं । तथा सति प्रत्यक्षे सन्मात्रावलंबनत्वस्य प्रामाण्यस्याप्रामाणिकत्वापातात् ॥ संभावनायाः प्रमात्व
भावादिति भावः ॥ सर्वमिदं अनुमानप्रामाण्यस्य साधनं ॥ समारब्धेति समारब्धाया अनुमानप्रा
माण्यपरीक्षायाः कारणीभूतं यद्व्याप्तिग्रहोपायप्रतिपादनं तस्य निदानमित्यर्थः ॥ व्याप्तिस्वरू
पज्ञाने हि व्यभिचारज्ञानाभावः ॥ सहचारग्रहश्च कारणं ॥ समानाधिकरणवृत्तिधूमत्वे

अव्यभिचारग्रहे

पव्याप्तौ सत्त्वात् आशस्य विशेषणतया तद्ज्ञानविधया उपयोगित्वेन प्रतिपादयितुं शक्यत्वेनान्यथे-
ति भावः॥ अव्याप्त्येति कपिसंयोगी एतद्वृक्षत्वादित्यादावित्यर्थः॥ साध्यवद्भिन्नो यः साध्याभाववानि-
तिकर्मधारये साध्याभाववद्वृत्तित्वस्यैव व्यर्थत्वमिति ततः सप्तमीतत्पुरुषं व्याचष्टे साध्यवद्भिन्ने इति॥ न च
साध्यवद्भिन्नेन समं अवृत्तित्वस्यान्वयाभावाद्यथा सन्निवेशेन वैयर्थ्यमिति वाच्यं॥ अभेदेन
साध्यवद्भिन्नान्वितसाध्याभावसंबन्धिनो वृत्तित्वे अन्वये साध्याभाववत्त्वस्य व्यावर्तकत्वेन वैयर्थ्या-
त्॥ साध्यवद्भिन्नावृत्तित्वस्यैव सम्यक्त्वादिति॥ न चाधिकरणभेदेनाभावभेदपक्षस्य वैतल्लक्षण-
मिति साध्यवद्भिन्ने ऽयोभाव इत्येतावते तु सामञ्जस्ये साध्यपदवैयर्थ्यमिति वाच्यं व्याप्यव्याप्यव्याप्यवृ- टी०
टी०२ त्तित्वविरुद्धधर्मसंसर्गेण द्रव्यवृत्ति संयोगाभावगुणादिवृत्तिसंयोगाभावस्यैव भिन्नत्वोपगमा-
त्॥ न तु घटत्वाभावादेरप्य- धिकरणभेदेन भेदाभ्युपगमः मानाभावादिति॥ यद्वित्वाभा-
वमात्रस्यैवाधिकरणभेदात् भेद इति मतेनेदं तदापि साध्याभावे सत्ताभावत्वं भावाभावसा-
न०११ धारणमुपात्तं॥ अन्यथा घटत्वाभाववानूप दत्तादिसादाव भाव साध्यकेभावभिन्नस्य साध्याभा-
वस्याप्रसिद्ध्याव्याप्तिः स्यात्॥ तथा च साध्यवद्भिन्नवृत्ति यो द्रव्यत्वादिकं च साध्यवत्त्वा- ॥३५॥
४॥ द्विरोधित्वात् विषयसंबन्धेनो तेन कालिकतया व्याप्यवत्तस्याभावे दैशिकतया साध्यतादा-
रूपाद्भ्यवाभाव्याभावसिद्धेति धमादवृत्तित्वे नासंभवो व्याप्य [illegible]

ध्येन आत्मत्वादिहेतौ नाव्याप्तिः॥ कर्मादावित्ति॥ तथा च॥ साध्यवद्भिन्नेग ण्यादौ यः कपिसंयो
गाभावः॥ सत्त्ववद्द्रव्ये पीयथ्याप्तिः इदमुपलक्षणं घटत्ववघटाकाशसंयोगान्यतराभाववाना
काशत्वादित्यादावव्याप्तिः॥ तत्र हि साध्यवद्भिन्ने घटे घटत्वतादृ शसंयोगरूपः॥ साध्या
भावसत्त्वादिति आकाशत्वस्य वृत्तेः॥ न च साध्यवद्भिन्नवृत्तित्वविशिष्टो यः साध्याभावस्तद्वृत्ति
त्वमित्युक्तौ नायं दोष इति वाच्यं॥ साध्यपदवैयर्थ्यात्॥ सिद्धिकर्मत्वं साध्यत्वमित्यभिप्रायेणोक्ते साध्य
वत्त्वस्येति अव्याप्तिरिति व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेनान्योन्याभावविशेषणे एतद्रूपवा
न्यत्तद्व्यसादित्यादौ च लक्षणगमनाय संग्रहेण भवतीति भावः॥ साध्याभाववत्ती साकल्यप्रवेशे एव साध्ये
सौधर्म्यं साधर्म्यकमिति प्रथमं साध्याभाववत्तिसाकल्यं व्याचष्टे साध्याभाववती साध्याभावे साकल्य
दानेन तु धूमवान् वह्नेरित्यादावतिव्याप्तिः तत्तत्सद्वावृत्तित्वावच्छिन्ना भावघटितसाध्याभावस्तो
मस्य प्रतियोगिव्यधिकरण्यावच्छिन्नस्याधिकरणे गुणादौ वह्न्यादेरभावसत्त्वादव्याप्तिः [illegible] च
पृथिवीत्वाभाववान् जलत्वादित्यादौ तत्र तत्तद्विपक्षवृत्तित्वावच्छिन्नाभावघटितसाध्याभावस्तोमा
धिकरणस्याप्रसिद्धिरिति तत्त्वेन दत्तं ननु वह्निमत्यपि सकलवह्न्यभावसत्तादव्याप्तिः॥ व्या
सज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेनाभावविशेषणे तु जातिमान् सत्त्वादित्यादाव
व्याप्तिः तत्र पूर्वक्षणवृत्तित्वविशिष्टसकलजात्यभावस्य जातिमान् सत्त्वा [illegible] दि [illegible] त्यादाव
[illegible] मत्यपि सत्त्वान्मयसकलसाध्यस्य तत्तद्व्यक्तित्वावच्छिन्नाभावस्यैव [illegible] गुणान्यत्वविशिष्ट॥

तेव्याप्तेः तत्र सकलसाध्यांतर्गताः सत्तायां द्रव्यत्वावच्छिन्नाभाववृत्तित्वात् इत्यादौ सत्तायां अभाव
सत्वादतः साध्यतावच्छेदकेति ।। व्याप्यवृत्तीति ।। कपिसंयोगी एतत्वादित्यादौ हेतौ अव्याप्यवृत्तित्वे तु तत्राभा
वसत्वेन नाव्याप्तिरिति भावः ।। यद्यपि हेत्वभावेपि प्रतियोगिवैयधिकरण्यस्यावश्यकत्वादेवाव्याप्यवृत्ता
वृत्ति व्याप्तिः संभवति तथापि यथाश्रुतस्य नाव्याप्तिरिति व्याप्यवृत्तीत्युक्ते व्यभिचारिणीति पृथिवी कपिसंयोगा
दित्यादौ अभाववद्येसाध्याभावे हेत्वभावे च प्रतियोगिवैयधिकरण्यं साध्यतावच्छेदकसंबंधेन हेतुतावच्छे
३।०।। दकसंबंधेन च यथायथं बोध्यं । तेन द्रव्यत्वप्रकारकेतत्समावान् द्रव्यत्वादात्मज्ञानादित्यादौ नातिव्याप्तिः व्याप्तिवा २।०।।
द्रव्यत्वप्रकारकत्वसमायां गुणादिकं न विषयः स एव प्रमात्वं तदेवेन धर्त्तव्या ।। तेन द्रव्याणि यावंति सर्वे प्रमेयमि
ति समूहालंबने द्रव्यत्वप्रमाविषयतायाः केवलान्वयित्वेन समवायेन तदभावस्य संबंधसामान्येन प्रतियोगि
तावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो बोध्यः ।। तेन गुणान्यत्वविशिष्टसत्तावान् ज्ञानेरित्यादौ नातिप्र
संगः नन्वसाध्याभावो वृत्तित्वेव वक्तुमुचितं तत्रैव न प्रथम[illegible] च हेत्वभावसमुच्चय इति किं नन्वतः तथासति ४।०।।
तत्प्रतियोगित्वमित्यत्र तत्पदेन हेत्वभावपरामर्शानुपपत्तेर्हेत्वभावप्रतियोगित्वमित्युक्तौ शब्द
३५।। गौरवादिति क्रमेण विशेषणयोः फलमाह तेनेत्यादिना ।। अत्र च निरुक्तप्रतियोग्यनधिकरणवृत्ति
त्वविशिष्टसाध्याभाववत्त्वस्य केवलनिष्ठनिरुक्तप्रतियोग्यनधिकरणत्वविशिष्टाभावप्रतियोगित्वं हे
तौ आद्यं तेन कपिसंयोगी एतत्वात् ।। कपिविभागादित्यादौ प्रतियोगिसमानाधिकरणभिन्नस्य साध्याभावे ३५।।
व्यधिकरणात् संभवेपि न क्षतिः हेत्वभावोपि [illegible] नासाध्याभावोपि प्रतियोगि ×१

स्यकेवलभावस्यचाप्रसिद्धत्वेपि प्रतियोग्यनधिकरणवृत्तित्यर्थः कपिसंयोगाभाववत्तावृत्तिद्रव्ये एतत्त
भावस्यासत्त्वेपि च न क्षतिरिति साध्ये साकल्याप्रसिद्धेः साध्याभाववति साकल्याप्रसिद्धेर्हेत्वभावे सक
ल साध्याभाववद्वृत्तित्वाप्रसिद्धेः क्रमेणाव्याप्तिमाशंक्य माह ॥ यत्रेत्यादिना ॥ तत्र साध्यतावच्छेदकावच्छि
न्नसाध्याभावविवक्षणे साध्ये साकल्याप्रवेशादाह ॥ विपक्षेत्विति ॥ एकधर्मेति इति विपरीतेनान्व क
यः ॥ ईश्वरभिन्नं घटत्वादित्यादावित्यर्थः तत्राव्याप्तिरित्यग्रेतनान्वयः ॥ ननु साकल्यमिह [illegible]
व्यापकत्वपर्यवसितमत आह ॥ निर्धूमत्वादीति निर्धूमत्वस्य धूमत्वावच्छिन्नसामान्याभावात्म
कस्यैकव्यक्तिकत्वात् साकल्याप्रसिद्धेरेव दोषः स्यात् व्याप्येति ॥ तादृशव्याप्यस्य जलत्वादेस्तादृशे
ण साध्यतायां निर्वह्निमत्स्य व्यभिचारित्वात् स्पष्टैव व्याप्तिमाह ॥ तत्त्वेनेति ॥ व्याप्यत्वेनेत्यर्थः ॥ ननु
साध्यवत्प्रतियोगिकान्योन्याभावसामानाधिकरण्यमित्येतस्य दोषेण दमपि दुष्टमत आह ॥ अन्ये
ति ॥ साध्यवदन्यस्मिन्नसत्त्वमित्यर्थः ॥ ननु यत्किंचित्साध्यवद्भेदमादाय साध्यवत्प्रतियोगि
कान्योन्याभावो भवतीयव्याप्तिर्वह्निमान् धूमादित्यादावितिभावः ॥ स्मृत्यसत्त्वेति ॥ अत्र च साध्य
वद्भेदेन लक्षण्या साध्यवत्त्वावच्छिन्नप्रतियोगिताकोवसंबंधः ॥ ननु विशेषणीभूतघट
[illegible] अभिधीयते ॥ तस्य चान्यशः [illegible] देशः भेदे भेदेनान्वयं घटोनेत्यादौ च घट

x घटाद्यैकदेशे तु यथा x3 नीलघटप्रकारकाभावबोधकत्वं तत्र यथा नीलो घटो नास्तीत्यादौ घटत्वावच्छिन्नप्रतियोगि

तदभावयोर्घटत्वावच्छिन्नप्रतियोगिताकत्वं संबंधः॥ ननु विशेषणीभूतघटत्वादिरभावेन स
मं प्रतियोगितावच्छेदकत्वं संसर्गः तथा सत्यभावीयो घट इत्याकारापत्तेः॥ एवं घटत्वस्येतरवि
शेषणीतया चाभावेऽन्वयासंभवाच्चेति ध्येयं॥ अत्र च घटत्वविशिष्टोपस्थापकपदसमभिव्याहृतेन
नञ्पदस्य घटत्वावच्छिन्नप्रतियोगितासंबंधेन घटप्रकारकाभावबोधकत्वं कार्यतावच्छेदकं नील
साकांक्षघटोपस्थापकपदसमभिव्याहृतनञ्पदस्य नीलघटत्वावच्छिन्नप्रतियोगितासंबंधेन नी
लघटबोधाभावः॥ तादृशार्थाभावात्॥ विशेषणांतरसाकांक्षत्वेनाज्ञातघटत्वादिविशिष्टोपस्थापक
पदसमभिव्याहृतनञ्पदस्यैव घटत्वावच्छिन्नप्रतियोगितासंबंधकबोधजनकत्वं वाच्यं॥
घटादन्य इत्यादौ च पंचम्या अवधित्वे अवधिमत्वे वा शक्तिस्तत्र च घटत्वावच्छिन्नवृत्तित्वं घटत्वाव
च्छिन्नवृत्तित्वं घटत्वावच्छिन्ने निरूपितत्वं वा संबंधः एवं घटस्याभाव इत्यादौ च प्रतियोगित्वे अनु
योगित्वे वा षष्ठ्यर्थे घटत्वावच्छिन्नवृत्तित्वादिकं संसर्गः कंबुग्रीवादिमान्नास्तीत्यादौ तु अयोग्य
तानिश्चयशून्यानां भ्रमात्मकशाब्दबोधः॥ घटतदभावयोर्घटत्वावच्छिन्नप्रतियोगितायाः एवं संबं
धत्वेन कंबुग्रीवादिमत्वावच्छिन्नप्रतियोगितासंबंधेन घटस्याभावे तादृशप्रतियोगितायाः एवं सं
बंधत्वेन कंबुग्रीवादिमत्वस्यासंबंधत्वात्॥ न चात्र भ्रमो न कंबुग्रीवादिमत्वस्यावच्छेदकत्वे तस्या

द्विता०
२६॥
टी०
भ०
२६

प्रकारत्वात्॥ नापि कंबुग्रीवादिमत्वावच्छिन्नप्रतियोगितासंबंधेन घटस्याभावे तादृशप्रतियोगिताया आ
श्रयत्वादिति वाच्यं कंबुग्रीवादिमत्वावच्छिन्नत्वप्रतियोगितामेव संबंधतयाभानात् अभावस्य घटत्वावच्छि
न्नप्रतियोगितयैव घटसंबंधितया कंबुग्रीवादिमत्वावच्छिन्नप्रतियोगितासंबंधेन घटसंबंधित्वे
ऽपि तेन संबंधेन घटप्रकारकत्वादिति॥ भूतले घटपटौ न स्त इत्यत्र भूतलवृत्त्यभावे घटपटयोरुभय
त्वावच्छिन्नप्रतियोगितासंबंधेनान्वयः॥ स्त इति द्विवचनं च प्रयोगसाधुत्वाय अत्र दाराः संतीति
वत्॥ भूतलवृत्त्यभाववृत्त्यघटपटोभयत्वावच्छिन्नप्रतियोगितासंबंधेन घटपटयोरन्वयः॥ त
था च भूतलवृत्त्यभावीयौ घटपटौ स्त इत्यन्वय इति। केचित्तु भूतलाधेयत्वस्य समभ्यर्थस्या
भावो घटपटोभयत्वसामानाधिकरण्येनेत्यपि केचित्॥ तस्य च जातौ सत्तौ द्रव्यत्वेन स्त इत्यत्र
गत्यभावः॥ घटपटौ न स्त इत्यादौ च घटत्वं पटत्वं उभयत्वं च परस्परसामानाधिकरण्यापन्नं प्र
तियोगितावच्छेदकं न तु उभयत्वमात्रं केवलं घटत्वं पटत्वं वा यत्किंचिदुभयवृत्ति केवलघटवृ
त्ति केवलपटवृत्ति वा घटपटौ न स्त इति प्रसंगात्॥ तादृशप्रतियोगितावच्छेदकावच्छिन्नं घटपटो
भयमेवातः॥ स्तद्वयवत्त्वेन तादृशाप्रत्ययः दंडवत् दंडी पुरुषो नास्तीत्यादावपि विशेषणविशेष्यभा
वापन्नं पुरुषत्वं दंडत्वं प्रतियोगितावच्छेदकमित्यादिकमूह्यं लक्षणयोश्च योनरुक्त्यमाशंक्याह॥ सा
ध्यमिति असामानाधिकरण्यं यस्येत्यत्र समानाधिकरणभिन्नस्य साध्यस्य स्वपदार्थसंबंधो ऽ
तानाधिकरणत्वाधिकरणत्वं तदधिकरणानधिकरणत्वं वा आदौ समानावान्

न्यतेतदबाधितंत्र विवक्षितंच इसतोथदितिकश्चित्॥ अत्रापि यत्तत्त्वेनानुगमादाह॥ साध्यतिष्ठे
ति॥ साध्यनिष्ठाभावप्रतियोगिवृत्तित्वेन निरूपकाधिकरणता प्रतियोगित्वं साध्यनिष्ठाभावीयवृत्तित्वनि
ष्ठप्रतियोगितायां निरूपकतासंबंधेनावच्छेदकं यदधिकरणं तद्वृत्तित्वमिति यावत्॥ द्रव्यं सत्वादित्यत्र द्रव्यत्वे
साध्ये गुणवृत्तित्वाभावस्य सत्वात् साध्यनिष्ठाभावीयवृत्तित्वनिष्ठप्रतियोगितायां निरूप
कतासंबंधेनावच्छेदको गुणस्तद्वृत्तित्वस्य सत्तायां सत्वान्नातिव्याप्तिः॥ ननु वह्निमान् धूमादित्या
दावव्ययोगोलकीयवह्नेर्पर्वतीयवह्नेर्वा महानसीयवृत्तित्वाभावस्य सत्वाभावस्य सत्वात् तादृशसाध्यनिष्ठा टी०॥
शि०॥ भावप्रतियोगिवृत्तित्वनिरूपकमधिकरणं महानसात्मकमेव तद्वृत्तित्वस्य धूमे सत्वादव्याप्तिः॥ किंच
साध्यनिष्ठासामानाधिकरण्याभिप्रायेण वृत्तित्वं साध्यतावच्छेदकसंबंधेन वाच्यं॥ अन्यथा सुखवानात्ममनस्संयोगा
न्यतरत्वादित्यत्रातिव्याप्तिः॥ तथाच संयोगेन द्रव्यसामान्यस्य साध्यतायां समवायेन हेतौ द्रव्यत्वे
व्याप्तिः तत्र संयोगेन गुणवृत्तित्वस्याप्रसिद्धतया साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वस्य गु
णत्वादावप्रसिद्धेरत आह साध्यनिष्ठाधेयत्वेति साध्यनिष्ठेध्वे यत्वं साध्यतावच्छेदकसंबंधेन बोध्यं भ०॥
तेन सुखवानात्ममनस्संयोगान्यतरत्वादियादौ संबंधसामान्येन सुखेनिष्ठाधेयत्वानिरूपकाधिकरणा
गगनादावृत्तेर्नातिव्याप्तिः॥ समवायेन वह्निनिष्ठाधेयत्वानिरूपकाधिकरणपर्वतादिवृत्तेर्धूमेनाव्या
रू१॥ प्तिः॥ वृत्तित्वमपि हेतुतावच्छेदकसंबंधेन बोध्यं॥ तेन संयोगेन वह्निनिष्ठाधेयत्वानिरूपके धूमा ३१॥

वयवसमवेते धूमे नाव्याप्तिः॥ नन्वेवं सत्तावान् द्रव्यत्वादित्यत्र समवायेन हेतौ द्रव्यत्वे द्रव्यं घटा
दित्यत्र संयोगेन हेतौ घटे चाव्याप्तिः॥ समवायेन साध्यनिष्ठाधेयतानिरूपकाधिकरणे सामान्या
दौ गुणादौ च हेतुतावच्छेदकसंबंधेन समवायेन संयोगेन च वृत्तेरप्रसिद्धिरत आह॥ साध्यनिष्ठे
ति॥ अत्र च व्यापकता हेतुतावच्छेदकसंबंधेन हेत्वधिकरणवृत्त्यवच्छिन्नाभावत्वेन बोध्या तेन व
ह्न्यधिकरणत्वावच्छिन्नाभावस्य प्रमेयत्वादिना धूमनिष्ठाधेयतानिरूपकाधिकरणत्वव्यापक
त्वेपि नातिव्याप्तिः॥ आर्द्रेन्धनजन्यवह्न्यधिकरणत्वाभावस्य तादृशाधिकरणत्वव्यापकत्वादाह॥
सामान्येति॥ वह्न्यधिकरणतासामान्यांतर्गतस्य अयोगोलकीयवह्न्यधिकरणतासामान्यस्य
तादृशप्रतियोगित्वाभावान्नातिव्याप्तिरिति॥ साध्यनिष्ठाधेयतानिरूपकाधिकरणत्वव्याप
कतावच्छेदकसंबंधनिरूपितहेतुतावच्छेदकावच्छिन्नाधिकरणतात्वावच्छिन्नाभावत्वकत्वमि
ति तु निष्कर्षः॥ तेन व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्य वह्न्याद्यधिकरणत्वाभा
वस्य धूमनिष्ठाधेयतानिरूपकाधिकरणत्वव्यापकत्वेपि नातिव्याप्तिः॥ अत्र च व्यापकतायां प्र
तियोगिव्यधिकरणत्वं न निविष्टं॥ तेन संयोगेन वह्न्यधिकरणत्वस्याव्याप्यवृत्तितया तदभाव
स्य केवलान्वयित्वेपि नातिव्याप्तिः॥ आनतिप्रयोजनकतयेति॥ हेतुतावच्छेदकावच्छिन्न हेत

धिकरणत्वाभावस्य घटकत्वे ऽपि तु तावच्छेदकावच्छिन्नाभावस्यानिवेशात्॥ यथासन्निवेशो ऽवैयर्थ्ये
पि अवैयर्थ्येपि अनतिप्रयोजनत्वादित्यर्थः॥ साध्यं अधिकरणं अनधिकरणं यस्य तत्साध्यानधि
करणाधिकरणं तन्निष्ठाभावः साध्यानधिकरणाधिकरणत्वं तदभावः॥ चरमनञर्थस्य तद्भिन्नत्वं
र्थः॥ प्रतियोगीव्युत्पत्तिवैचित्र्यात्॥ नञ्व्यत्यासाद्वा द्वितीये ऽपि सदेव प्रतियोगीव स्कंधस्कंध
यानधिकरणं भूतह्रदमित्यादौ भूतले घटाधिकरणत्वावच्छिन्नभेदः प्रकारतया भासते तत्र
चानधिकरणे ऽत्र अधिकरणपदं घटपदसमभिव्याहारबलात्॥ लक्षणया धराधिकरणप
टि०॥ घापकं घटपदं तात्पर्यग्राहकमात्रं॥ अन्यथा घटपदेन सममधिकरणपदस्य षष्ठीतत्पुरुष
समासे घटसंबंधानधिकरणमित्यर्थः॥ स्यात् तथा च बाधः॥ अधिकरणत्वावच्छिन्नभेद टी०॥
स्य भूतले ऽभावात्॥ अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्य व्युत्पत्तिवलभ्यतया ऽनधि
करणपदेन घटाधिकरणत्वावच्छिन्नभेदस्य प्रत्याययितुमशक्यत्वात्॥ एवं प्रतियोग्यनधिक मू०॥
रणेत्यादौ अग्रे तथैव रीतिरनुसंधेया॥ साध्यनिष्ठाधेयतानिरूपकत्वं हि साध्यनिष्ठाधेय
ग०३८॥ तानिरूपकत्वसामान्याभावो यत्किंचित्साध्यनिष्ठाधेयतानिरूपकत्वं वा॥ आद्ये आह॥ केव
लान्वयीति॥ केवलान्वयिसाध्यके इत्यर्थः॥ अव्याप्तेरिति पूरयन्ति॥ साध्यनिष्ठेति॥ द्वितीये॥ नने ग०३८॥
ति॥ वह्निमान् धूमादित्यादौ॥ आद्ये दोषमाह॥ केचिदिति॥ गुणान्यत्वविशिष्टसत्तावान् जाती

तेरित्यादौ॥सत्तारूपसाध्यनिष्ठाधेयत्वनिरूपकत्वस्य सामान्यादावेव सत्वेन तत्र जात्यधिकरणत्वाभाव
स्य सत्वादिति भावः॥तदा केवलान्वयिनीति॥यद्यपि सत्तावान् द्रव्यत्वादित्यादौ व्याप्तिस्तथापि साध्यव
द्भिन्नेयदधिकरणत्वाभावस्तत्तोऽतद्व्यभिचारः संभवतीति तन्नोक्तं॥नानाधिकरणकेति॥
यत्तु पर्वतान्यतरद्रसौदिग्यादौ द्वित्वावच्छिन्न साध्यवद्भेदस्य साध्यवति संभवेपि प्रतियोग्यवृ
त्तित्वस्य भेदे विशेषणत्वे तेनाव्याप्तिः॥संभवतीति नानधिकरणकेत्युक्तं सर्वत्र अन्वयिनिव्य
तिरेकिणश्च॥हेतुतावच्छेदकेति॥हेत्वधिकरण इति सप्तम्यर्थावच्छेदकतायां॥हेत्वधिकरणा
वच्छेदेनेत्यर्थः॥तेनेव॥हेतुतावच्छेदकसंबंधेनैव॥आद्यदलव्यावृत्तिमाह॥संयोगेनेति॥अवृ
त्तित्वेपीत्यनेनान्वयः॥वह्निमतीत्यत्रापि संयोगेनेत्यनुषज्यते तत्र चायोगोलं च समवायेन वह्निः॥
साध्यस्तथा संयोगेन हेतोर्धूमो दवतीति व्यभिचारणा॥संबंधांतरेणेति॥न चाकाशादेवृत्तस्य
प्रसिद्धिरिति संबंधांतरेण वर्त्तमानपर्यंतानुधावनं व्यर्थमिति वाच्यं॥आकाशादेरवृत्ति
त्वेनतद्वृत्तित्वाभावे हेत्वधिकरणावच्छिन्नत्वासंभवात्॥यद्यपि यवेतरूपादेरपि वृत्तिनि
संयुक्तत्वाभावस्य नपर्वतादिदेशावच्छिन्नत्वं॥रूपादेः॥कुत्रापि संयोगाभावेन स्वरूपेणै
व वृत्तेर्योगी॥वस्तुतस्तु॥घटानधिकरणं भूतलं घटीत्यादौ भूतले घटत्वाधिकरणत्वावच्छि

...भेदः॥ प्रकारतयान्वयस्ते तत्र चानधिकरणेत्यत्राधिकरणपदं घटपदसमभिव्याहारबला
त्तल्लक्षणया घटाधिकरणोपस्थापकं घटपदं तात्पर्यग्राहकमात्रं॥ अन्यथा घटपदेन सममधिकरणपदस्य
षष्ठीतत्पुरुषसमासे घटसंबंधानधिकरणमित्यर्थः॥ स्यादिति॥ तथा च बाधः॥ अधिकरणत्वावच्छिन्नपदस्य भू
तले ... भावात्॥ अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्य ... तयानधिकरणप
देन घटाधिकरणत्वावच्छिन्नभेदस्य प्रत्याययितुमशक्यत्वात्॥ एवं प्रतियोग्यनधिकरणेत्यादौ प्रकृते
ऽप्येवं रीतिरनुसंधेया साध्यनिष्ठाधेयतानिरूपकत्वं हि साध्यनिष्ठाधेयतानिरूपकत्वसामान्याभावो यत्कि
ञ्चित्साध्यनिष्ठाधेयतानिरूपकत्वं वा॥ आद्ये आह॥ केवलान्वयीति केवलान्वयिसाध्यक इत्यर्थः॥ अ
व्याप्तेरिति पूरयति॥ साध्यनिष्ठेति॥ द्वितीये॥ नानेति॥ वह्निमान्धूमादित्यादौ॥ आद्ये दोषमाह॥ केचिदि
ति गुणान्यत्वविशिष्टसत्तावान्जातेरित्यादौ॥ सत्तारूपसाध्यनिष्ठाधेयतानिरूपकत्वस्य सामान्यादावेव सत्त्वेन तत्र
जात्यधिकरणत्वाभावस्य सत्त्वादिति भावः॥ तदा केवलान्वयिनीति॥ यद्यपि सत्तावान्द्रव्यत्वादित्यादावव्याप्तिस्त
थापि साध्यवद्भिन्नेत्यस्य साध्यवदधिकरणत्वाभाव इत्युक्तौ तदव्याप्तिवारणं संभवतीति तन्नोक्तं॥ नानाधिकरणके
ति तु तद्रूपवान्द्रव्यत्वादित्यादौ द्वित्वावच्छिन्नसाध्यवद्भेदस्य साध्यवति संभवेऽपि प्रतियोग्यवृत्तित्वस्य भे
दविशेषणत्वेन नाव्याप्तिः संभवतीति नानाधिकरणकेत्युक्तं सर्वत्र अन्वयिनि व्यतिरेकिणि च हेतुताव
च्छेदकेति हेत्वधिकरण इति॥ सप्तमी अवच्छेदकतायां॥ हेत्वधिकरणावच्छेदकतायां॥ हेत्वधिकर
णावच्छेदेनेत्यर्थः॥ तेनैव॥ हेतुतावच्छेदकसंबंधेनैव॥ आद्य ... इति मात्र॥ संयोगेनेति॥ अद्वितीयेऽस्य नना

द्रव्यते इति वाच्यं॥ विरुद्धस्वभावयोर्भावाभावयोरेकत्र प्रतीतेरवच्छेदकभेदमादायैव संभवात्॥ प्रकृते च
गुणद्रव्यादिरूपावच्छेदकाप्रतीतावपि द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरिति भिन्नप्रसयात्॥ नन्वेवं संयोगाभावो
व्याप्यवृत्तिर्न स्यात्॥ मूलेन संयोग इत्यादिप्रतीते मूले संयोगावच्छेदकताभावस्यैवविषयत्व
मिस्यस्यापि सुवचत्वादित्यत आह बाधकाभावादिति॥ तथ संयोगाभावेन द्रव्यवृत्तित्वस्य प्रत्ययादि
ति भावः॥ ननु द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरिति प्रसयोर्विवादग्रस्त इत्यत आह॥ अतीन्द्रियेति॥ अ
न्यतरस्य चेन्द्रियकतायां कदाचित्साध्यवद्वृत्तित्वाभावस्य हेतुवृत्तित्वस्य प्रत्यक्षसंभवः इत्यभिप्रायः अती
न्द्रियसोपादानं॥ इदं गुरुत्ववत् आकाशाभावादिस्यैवेत्यर्थः नन्वत्र प्रत्यक्षासंभवेपि आकाशा
भावो गुरुत्ववद्वृत्तित्वाभाववान् गुरुत्वाभाववद्वृत्तित्वात् रूपाभाववत्॥ इत्यनुमानं संभवतीत्य
त आह॥ न चेति॥ तत्र अतीन्द्रियेव्यभिचारिणि॥ तद्व दिति॥ गुरुत्ववद्वृत्तिभिन्नवृत्तित्वस्य चाव्याप्यवृत्तित्वा
भावादाकाशाभावादौ साधनाव्यापकत्वं रूपाभावादौ साध्यव्यापकत्वमिति भावः॥ नन्वेवं अतीन्द्रियसंयोग
स्याव्याप्यवृत्तित्वानुपपत्तिः॥ तत्र प्रत्यक्षाभावात्॥ अनुमानस्याप्रयोजकत्वात् किंचातीन्द्रियसाध्य
केव्यभिचारानिर्णय एव कुतोऽनुमानादिति यदि तदा तत्तद्वृत्तित्वाभावोप्यनुमीयतां अप्रयो
जकत्वादिकायाऽभयत्र तुल्यत्वादित्यत आह किंचेति॥ इहमिदानीमित्यादिकालिकसंबंधेनेत्यर्थः॥ काली
नघटवानुपदादिस्यत्र कालिकसंबंधेन प्रत्याधिकरणे कालेतेन संबंधेन साध्यसत्वेव वृत्तित्वस्याभाव

वतोऽप्रसिद्धेरिति ॥ संबंधांतरेण कालवृत्तेरपि कालिकसंबंधेनापि तद्वृत्तित्वात् ॥ अवृत्त्यभावस्यावा
नवच्छिन्नत्वादिति भावः ॥ तु तेन मठाकाशस्यापि तादात्म्येन स्वसंबंधितयात्रैव साध्यवद्वृत्तित्वाभाव
वत्त्वप्रसिद्धिरिति परास्तं ॥ तादात्म्यसंबंधात्वस्यावच्छेदकत्वानियामकत्वात् ॥ अत्र केचित् ॥ साध्य
वद्वृत्तित्वाभावे यद्धेत्वधिकरणावच्छिन्नत्वयद्धेतुवृत्तित्वोभयाभावसत्वं सा व्याप्तिः ॥ व्यभिचारिणि
विवक्षणीयं तेन कालिकसंबंधेन हेतुतायामवृत्तिनिष्ठसाध्यवद्वृत्तित्वाभावे हेत्वधिकरणकालाव
च्छिन्नत्वहेतुवृत्तित्वोभयाभावसत्वान्नाव्याप्तिः ॥ व्यभिचारिणि च व्यभिचारनिरूपकहेत्वधिक
त्रि॰॥ रणावच्छिन्नत्वहेतुवृत्तित्वोभयस्य तादृशावृत्तित्वाभावे सत्त्वान्नातिव्याप्तिरित्याहुः ॥ तन्न ॥ वह्निमानु
धूमादित्यत्र स्वावच्छेद्यवावच्छेदेन धूमवृत्तिसाध्यवद्वृत्तित्वाभावस्य रूपादिनिष्ठस्य हेत्वधिकरणावच्छि टी॰
न्नत्वेनाव्याप्तिरिति हेत्वधिकरणावच्छिन्नत्वस्याव्याप्यवृत्तित्वेन तदभावोपपादने व्यभिचारिणि
अतिप्रसंगात् ॥ अपरे तु स्वनिष्ठसाध्यवद्वृत्तित्वाभावानवच्छेदकहेतुतावच्छेदकसंबंधीयहे
त्वधिकरणकत्वविवक्षया न दोषः ॥ न च वह्निमान् धूमादित्यत्र स्वनिष्ठं यत्सामानाधिकर
ण्यं रूपादिनिष्ठस्य तदभावस्यैव पर्वतादेरवच्छेदकत्वादव्याप्तिरिति वाच्यं ॥ स्वनिष्ठाय:
॥४२॥ सामानाधिकरण्याभावस्तदनवच्छेदकत्वस्योक्तत्वात् ॥ यद्यपि धूमवृत्तितदभावस्यापि रू
पादिनिष्ठतदभावाभिन्नतया स्यावच्छेदकमेव हेत्वधिकरणं पर्वतादितथापि तदभावस्य ॥४२॥

रूपादिवृत्तित्ववृत्तावच्छेदकं पर्वतादिनं तु धूमादिवृत्तित्वं इति नोक्तदोषः॥ नन्व पर्वतीयधूमस्यापि कालिकसंबंधेन म
हानसवृत्तितया महानसे पर्वतीयधूमेन वह्निमद्वृत्तित्वमिति प्रसयात्॥ हेतुवृत्तितदभावस्यावच्छेदकमेव महान
सादिकं हेत्वधिकरणं मिति व्याप्तिरिति वाच्यं॥ स्ववृत्तितदभावोनवच्छेदकस्याधिकरणकत्वस्याविवक्षितत्वात्॥
प्रकृते च पर्वतीयधूमवृत्तितदभाव धूमवृत्तितदभावस्यानवच्छेदकमेव हेतुतावच्छेदकसंबंधेन पर्वती
यधूमाधिकरणं पर्वतादिकमित्याहुः॥ अत्रास्मस्यानवच्छेदकमेव हेतुतावच्छेदकसंबंधेन पर्वतीयधू
माधिकरणं पर्वताद्युच्चरणाः॥ इदं पार्थिवपरमाणुत्वाभाववत्॥ परमाणुत्वाभावादित्यादावव्याप्तिः॥
अत्र परमाणुत्वाभावस्य कालिकादिसंबंधेनाधिकरणे कालादौ तस्य दैशिकसंबंधेनापि वृत्तित्वेन सा
द्कसाध्यववृत्तित्वाभावस्य हेतुवृत्तित्वाभावात्॥ परमाणोश्च कालिकादिसंबंधेनापि तस्यावृत्तेः परमा
णोः कालोपाधित्वाभावात्॥ न च मूर्तमात्रस्य दिगुपाधित्वात्॥ परमाणोर्दिगुपाधितया परमाणु
त्वाभावाधिकरणत्वात्तदवच्छेदेन परमाणुत्वाभाववत्पार्थिवपरमाणुत्वाभाववद्वृत्तित्वाभावः॥ असि
द्धेरेवेति वाच्यं॥ कालिकसंबंधवत्॥ दैशिकसंबंधस्यातिरिक्तस्याभावात्॥ कुतानामेव संयोगा
दीनामिदं तिप्रत्ययनियामकत्वात्॥ परमाणोश्च परमाणुत्वाभावस्य कुत्रसं बंधानामभावात्॥

यदि च कालिकसंबंधवत् दैशिकसंबंधोऽप्यतिरिक्तोऽभ्युपेयते तदापि यत्र यस्य तथा प्रतीतिस्तत्रैव त
स्यात् तादृशः संबंधः कल्प्यते न चेह परमाणौ परमाणुत्वाभाव इति प्रतीतिसंभावेऽपि इस्यदानीं घट
त्वाभाव इति प्रतीत्या यथा घटेऽपि घटत्वाभावो विषयीक्रियते तथा परमाणौ परमाणुत्वाभाव इति
प्रतीतिसंभावेऽपि इह परमाणुत्वाभाव इति प्रतीत्या परमाणावपि दैशिकाविशेषणसंबंधेन परमा
णुत्वाभावोऽपि विषयीक्रियत इत्युच्यते ॥ तदापि आकाशत्वाभाववत् आत्माकाशान्यतरत्वाभावादिसा
श्री ॥ ध्यकव्याप्तिर्वज्रलेपायते वा आकाशस्याजन्यत्वेनामूर्तत्वेनान्यकेनापि संबंधेन हेतोरनधि
करणत्वादिसाध्यहेतुः ॥ परे तु हेतुतावच्छेदकसंबंधेन वृत्तिमद्वृत्तेर्यः साध्यवद्वृत्तित्वाभावस्तदनवच्छे श्री ॥
दकत्वं हेत्वधिकरणस्य वाच्यम् ॥ तेन पार्थिवपरमाणुत्वाभाववदित्यादौ पार्थिवपरमाणुवृत्तौ तादृशो
घटत्वाभावे वर्तमानस्य पार्थिवपरमाणुत्वाभाववद्वृत्तित्वाभावस्यानवच्छेदकमेव परमाणुत्वा श्री ॥
भाववद्रूपहेत्वधिकरणमिति न कोऽपि दोषः ॥ एवं आकाशत्वाभावे आत्माकाशान्यतरत्वाभावादि
रूपोऽन्वयोऽपि क्रमेण धूमादौ व्याप्तिः ॥ हेतुतावच्छेदकसंबंधेन वृत्तिमद्वृत्तिर्यस्तदभावस्त
॥४८॥ दनवच्छेदके हेतुतावच्छेदकसंबंधेन तस्य हेतोरधिकरणमिति विवक्षितत्वात् ॥ भवति म ॥४८॥
ज्ञानसावच्छेदनपर्वतीयधूमे यस्तदभावस्तदनवच्छेदकं पर्वतीयधूमाधिकरणं ॥ एवं तादृशी

घटत्वाभावाधिकरणस्य हेतुभूतपरमाणुत्वाभावाधिकरणस्य च ॥ यदेः पार्थिवपरमाणुत्वाभाववद्वृत्तित्वाभावान
वच्छेदकत्वान्न तत्राव्याप्तिरिति यत्तु स्वाधिकरणावच्छिन्नस्ववृत्त्यभाववत्त्व ॥ तत्त्वावच्छेदेन साध्यवद्वृत्तित्वप्रतियोगिक
त्वाभावत्वं स्वाधिकरणावच्छिन्नस्ववृत्त्यभावप्रतियोगितानवच्छेदकं यत्साध्यवद्वृत्तित्वप्रतियोगिकत्वाभा
ववत्त्वं स्वाधिकरणावच्छिन्नस्ववृत्त्यभावप्रतियोगितानवच्छेदकं यत्साध्यवद्वृत्तित्वं तत्त्वं वा विवक्षितं । पर
माणुत्वाभावादेः स्वाधिकरणीभूतघटाद्यवच्छिन्नस्ववृत्तिघटादिवृत्तित्वाभावे पार्थिवपरमाणुत्वाभाव
वद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकत्वाभावान्नाव्याप्तिर्न व्यभिचार इति यत्तु ॥ किंचिदभावस्य साध्य
वद्वृत्तित्वप्रतियोगिताकत्वाभावादवच्छेदेनेति ॥ यद्यपि उत्पत्तिकालावच्छेदेन धूमस्य पर्वते वह्नि
मद्वृत्तित्वाभावो धूमेऽप्यस्ति पर्वते धूमे उत्पत्तिकाले धूमेन वह्निमद्वृत्तित्वमित्यनुभावात् ॥ तथापि स्वे
स्वाधिकरणमात्रावच्छिन्नहेतुवृत्त्यभाव इति विवक्षणीय ॥ प्रकृते तु उत्पत्तिकालस्याप्यवच्छेदकत्वान्नाव्या
प्तिः यत्तु ॥ उत्पत्तिकालावच्छेदेन धूमस्य पर्वते वृत्तित्वात्तत्कालावच्छेदेन तत्र साध्यवद्वृत्तित्वाभाव इति
तन्न घटे गंधवान् पृथिवीत्वादित्यादौ उत्पत्तिकालावच्छेदेन घटवृत्तौ पृथिवीत्वे तदवच्छेदेन गंधवद्वृ
त्तित्वस्य संभवादव्याप्तेः ॥ तस्माद्यथोक्तमेव सम्यक् ॥ परे तु । पर्वतस्थ एव वह्निमत्संयुक्तत्वेना
स्तीति प्रतीतिबलात् ॥ पर्वतादिरवच्छेदकत्वं विषयीक्रियते तत्र पर्वतरूपमोरपि स्यमवायुः सं
ध विषया ॥ वच्छेदकः । अन्यथा पर्वतावृत्तिपदार्थेऽपि वह्निमद्वृत्तित्वाभावे पर्वतस्यावच्छेदक

शि॰ टी॰ व्याप्तिः। अत एवोक्तं संबंधांतरेणावर्तमाने सुरभि इति। तथा च हेतुतावच्छेदकसंबंधेन यद्धेयत्वं धिकर
णं निष्ठहेतुतावच्छेदकसंबंधे साध्यवृत्तित्वाभावावच्छेदकत्वाभावस्तद्धेतुसमुक्तलक्षणार्थः। महानसप
र्वतीयधूमे वह्निमदिति त्वं नास्तीति प्रतीतिबलात् पर्वतीयधूमे वह्निमत्संयुक्तत्वाभावे यन्महानसस्याव
च्छेदकत्वं तत्र महानसपर्वतीयधूमयोः कालिकसंबंधयोरेव संबंध विधेयावच्छेदकन्तु संयोग इति ना
नेति।। तच्च यद्यपि घटत्वेन वाच्यत्वाभावमादाय स्वोक्तं प्रथमलक्षणं वाच्यत्वेन घटाभाववद्वायाविति वे
४३ यं च संगतमेव तथापि साध्यतावच्छेदकसमनियतप्रतियोगिताकाभावघटितसार्वभौमीयल ४०
क्षणासाधारण्यार्थमथमारभ इति भावः। तत्र अभाववानुवामेवचारियत्राभावत्वादिसमनिय
तप्रतियोगिताकाभावदर्शयति।। भावत्वेनेत्यादिना।। यद्वा।। प्रमेयत्वावच्छिन्नसाध्यके एव समनि
यताभावैक्यमते भावत्वेन योऽभावाभावः स एवाभावत्वेन भावाभाव इति। भवति मे यत्त्वं समनि
यतप्रतियोगिताक इति भावः।। ननु। समनियताभावैक्यमते वह्निमान् धूमादित्यत्र वह्नित्व
समनियतप्रतियोगिताकभावस्याः प्रसिद्ध्या लक्षणाव्याप्तिः। वह्नित्वेन वह्न्यभावत्वाभावत्व

पकतावच्छेदिकाया या प्रतियोगिता प्रत्येकं तदाश्रयसामानाधिकरण्यं वक्तव्यं। प्रकृते चायोगोलकान्यत्वत्वावच्छिन्न
प्रतियोगितादेरपि तथात्वात् तदाश्रयायोगोलकान्यत्वासमानाधिकरणत्वाभावात् इति व्याप्तिरिति वाच्यं। एवं सति जलहृ
त्त्वविशिष्टयोर्दिग्ग्रंथविरोधात्। अभावे साध्यतावच्छेदकावच्छिन्नेत्यादिवैयर्थ्याच्च। गोत्वाभावादेरपि गोत्वत्वेन प्रमेया
भावाभिन्नतया तत्तद्घटध्वंसादेस्तत्तद्ध्वंसकालावच्छेदेन तत्तद्ध्वंसवद्वृत्तित्वेन प्रमेयाभावाभिन्नतया तादृशप्रतियोगि
ताश्रयसामानाधिकरण्यसंभवात्। अत समनियताभावभेदाभिप्रायेणैव प्रथमलक्षणमुक्तं। असमनियताभावेऽव्या
प्तिप्रायेणैव लक्षणांतरमाह। यत्समानाधिकरणानामित्यादि। तथा च तत्रातिव्याप्तिवारणाय प्रतियोगितावच्छेदका
वच्छिन्नसमानाधिकरण्यं वाच्यं। तथा चासंभवेन वह्निमान् धूमात् सत्तावान् जातेरित्यादौ जलहृत्त्वविशिष्टद्रव्य
त्वाभावस्य गुणान्यत्वविशिष्टसत्ताभावस्य च तादृशस्य स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगितावच्छेद
कावच्छिन्नासमानाधिकरणत्वात् तद्व्यापकतावच्छेदकरूपावच्छिन्नेत्यादि जलहृत्त्वविशिष्टद्रव्यत्वत्वस्य वह्नि
त्वावच्छिन्नं प्रति गुणान्यत्वविशिष्टसत्तात्वस्य च सत्तात्वावच्छिन्नं प्रति च व्यापकतानवच्छेदकतात्तदवच्छिन्नाभावमादा
येन दोषः। यत्तु। वह्नित्वेन हृदाभावस्य हेत्वधिकरणे प्रतियोगिसामानाधिकरण्याभावादव्याप्तिरतः। प्रतियोगि
तावच्छेदकावच्छिन्नेति हृदत्वेन वह्न्यभावस्य हेत्वधिकरणे प्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरण
त्वादव्याप्तिरतो व्यापकतावच्छेदकरूपावच्छिन्नेति तदसत् वह्नित्वेन हृदाभावस्यापि हृदत्वेन वह्न्यभावाभिन्न
तया प्रतियोगितावच्छिन्नाभ्यां छेदकाभ्यां सामानाधिकरण्यसंभवात्। शेषमिति हेतुतावच्छेदकसंबंधेन हेतुतावच्छे

तावच्छेदकवि

दकविशिष्टहेतुसमानाधिकरणत्वं साध्यतावच्छेदकसंबंधेन साध्यविशिष्टसाध्यनिरूपितव्यापकता व्यापकता घटकसं
बंधेन साध्यतावच्छेदकसंबंधेन वा प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं महाकालान्यत्वविशिष्ट
शि॰न्दी॰भ॰ग॰ घटवान् कालत्वादित्यत्र प्रतियोगितावच्छेदकविशिष्टसामानाधिकरण्याभावादेवानतिप्रसंगात्। इत्थं च
व्यापकतापि साध्यतावच्छेदकसंबंधेन वाच्या। हेतुतावच्छेदकसंबंधेन हेतुतावच्छेदकविशिष्टाधिकरणं यत्
स्वविशिष्टं तदवच्छेदेनता दृशसामानाधिकरण्यं हि स्यादित्याह तिस्त्रः पूर्वमेव प्रपंचितेति। अत्र केचित् वह्नि
त्वेन धूमकालावच्छेदेन धूमवद्वृत्तित्वविशिष्टस्याभावो धूमाभाव एव द्रव्यवृत्तित्वेन धूमवद्गुणान्यतरस्याभा
अयोगोलकभेद वो धूमभेद एव अयोगोलकभिन्नवृत्तित्वेन अयोगोलकान्यभेदान्यतरस्याभावो ऽयोगोलकान्यत्वाभाव एव
तेषां चाभावानां हेत्वधिकरणावच्छेदेन वह्नित्वद्रव्यवृत्तित्वायोगोलकभिन्नवृत्तित्वरूपप्रतियोगितावच्छेदका
वच्छिन्नसामानाधिकरण्याद्धूमवान् वह्नेरित्यत्राव्याप्तिरिति। ननु साध्यव्यापकतावच्छेदकं यत्प्रतियोगि च
तावच्छेदकं प्रत्येकं तत्तदवच्छिन्नसामानाधिकरण्यं वाच्यं साध्यतावच्छेदकावच्छिन्नेत्यादिवैयर्थ्यात्। गोत्वाभावा
देरपि प्रमेयत्वेन गोवृत्तिकिमपि नास्तीति धीविषयाभावाभिन्नतया प्रतियोगितावच्छेदकावच्छिन्नसमानाधि
करणत्वादेतत् किं चैवमभावेयावद्विशेषणमपि व्यर्थं स्यात् ननु प्रमेयत्वेन घटाभावमादाय धूमवान् व
ह्नेरित्यत्राव्याप्तिः। प्रमेयत्वेन घटाभावस्यापि धूमत्वेन घटाभावाभिन्नतया हेत्वधिकरणावच्छेदेन धू
मत्वावच्छिन्नसमानाधिकरणत्वादेवातिप्रसंगाभावात्। अत्र गुरवः वह्नित्वेन धूमवद्वृत्तिकिमपि ना प्रमेयं

प्रकृते च धूमाभावायोगोलकान्यतराभावादीनामपि तादृशत्वात्तदवच्छिन्नसामानाधिकरण्याभावान्नातिव्याप्तिरिति वाच्यं।

स्तीति। प्रतीते र्दंडेन पुरुषेणास्तीत्यत्रेव विशिष्टधर्म्मघुव प्रतियोगितावच्छेदकत्वेन भासते न शुद्धवह्नित्वं अन्यथा उ
क्तप्रतीतौ वह्नेरपि प्रतियोगित्वेन प्रतियोगितावच्छेदकविशिष्टप्रतियोगिभिन्नत्वस्य योगोक्ते तद प्रत्ययप्र
संगात्। न च धूमवद्वृत्ति किमपि नास्तीत्यंशे तादृशानिखिलस्यैव प्रतियोगितावगाहनेनान्यांशे वह्नित्वविर
हेण कोऽपि वह्नित्वस्यैवावच्छेदकत्वमितिवाच्यं। धूमवद्वृत्तित्वविशिष्टवह्नित्वस्येव तादृशवह्न्यंशे समानाधिक
रणतयाऽन्यांशे व्यधिकरणतयाऽवच्छेदकत्वं संभवादित्याहुः। परे तु स्वन्यूनवृत्तिसमानाधिकरणधर्मान
वच्छिन्नाया प्रकृताभावप्रतियोगितातद्वच्छेदकावच्छिन्नसामानाधिकरण्यं वाच्यं। वह्नित्वेन धूमवद्वृत्ति
पा किमपि नास्तीत्यत्र प्रकृतप्रतियोगितान्यूनवृत्तिसमानाधिकरणतयैव वह्नित्वमवच्छेदकमिति तद्व्युदासः
तादृशमानान्याभावाभिन्नतया धूमत्वमपि न तादृशमवच्छेदकमिति वाच्यं। प्रमेयसामान्याभावप्रतियो
गितातो धूमत्वावच्छिन्नधूमाभावप्रतियोगिताया विवक्षणत्वात् एतस्याश्च स्वन्यूनवृत्तिसमानाधिकर
णधर्मानवच्छिन्नत्वेन तदवच्छेदकधूमत्वावच्छिन्नासमानाधिकरणत्वेनैवानतिप्रसंगादित्यादिक्॥५८॥
वृक्षवर्त्तिलक्षणमाह॥ केचित्त्विति। इदं कपिसंयोगि एतत्वादित्यत्राव्याप्तिवारणाय अव्याप्यवृत्तेरिति वे
ह्नित्वेन घटाभावस्य प्रतियोगितावच्छेदकमेव न वह्नित्वमतः साध्येति॥ समवायेन वह्न्यभावस्य धूमादि
वावच्छेदकं शुद्धसमानाधिकरणशुद्धव्यधिकरणं वेति न च धूमाभावादेरपि धूमत्वेन प्रमेयसामान्याः ५

मानाधिकरणस्य प्रतियोगितावच्छेदकमेव वह्नित्वमतः साध्येति। समवायेन वह्न्यभावस्य धूमादिसमानाधिकरणस्य
प्रतियोगितावच्छेदकत्वाद्वह्नित्वादेरसंभवादित्यतः साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वं साध्यतावच्छेदकसंबंधातिरि
शि॰टी॰भ॰॥ क्तसंबंधानवच्छिन्नप्रतियोगिताकत्वं वाऽभावे देयं तेन व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकसंबंधानंगीकारेऽपि
न क्षतिः। अत्र प्रतियोगिव्यधिकरणपददाने इदं वाच्यं। ज्ञेयत्वादिसाध्ये प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धिरिति तन्नो
क्तं व्याप्यवृत्तित्वं च हेत्वधिकरणे बोध्यं तेन कपिसंयोगी एतत्त्वादित्यत्र कपिसंयोगाभावस्य गुणे व्याप्यवृत्तित्वेऽपि न क्षतिः। तत्र
हेत्वधिकरणीभूतयत्किंचिद्व्यक्तिवृत्त्यभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यद्यदभाववत्त्वं तत्त्वं यत्किं
चित्त्वप्रवेशाच्च कपिसंयोगाभाववत्त्वे किंत्वस्य सत्त्वाधिकरणे गुणनिष्ठाभावप्रतियोगितानवच्छेदकत्वाद्गुणे व्याप्यवृत्तित्वमिति क
पिसंयोगी सत्त्वादित्यादौ नातिव्याप्तिः सर्वस्यैवाभावव्यक्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितावच्छेदकत्वात्सा संयोगाभावस्य
मानाधिकरण्येनेति। शेषं पूर्वोक्तदिशावसेयं ननु वह्नित्वावच्छिन्नघटाभावस्य घटत्वावच्छिन्नवह्न्यभावाभिन्नतया साध्याभा
वस्य तस्य प्रतियोगितानवच्छेदकत्वात्। सामानाधिकरण्येनेति। शेषं पूर्वोक्तदिशावसेयमेव वह्नित्वमित्यव्याप्तिरतः समनिय
ताभावैक्यमते लक्षणमाह। हेतुसमानाधिकरणेति। ननु यत्किंचित्त्वं नैकं तथा च हेत्वधिकरणव्यक्तीः शृंगग्राहि
कतया उपादाय तद्व्यक्तिवृत्त्यत्यंताभावप्रतियोगितानवच्छेदकं यद्यदभावव्यक्तित्वं तत्तदभावप्रतियोगितानवच्छेदक
त्वं वक्तव्यं तथा चातिगौरवं किंच आकाशाभावस्य कालिकसंबंधेन अभावे साध्ये आत्मत्वादिहेतौ ताव व्याप्तेः तत्र हेतु
समानाधिकरणस्य देशिकतया आकाशाभावात्मकाभावस्य व्याप्यवृत्तेः प्रतियोगितायाः अवच्छेदकत्वात्तादृशाभा

नाभाववत्त्वस्येत्यत आह। प्रतियोगिव्यधिकरणस्येति। केचित्तु। भावाभावसाधारणं व्याप्यवृत्तित्वं नैकं भावनिष्ठव्याप्यवृत्ति
त्वस्य संयोगादिवृत्तिसंबंधावच्छिन्नप्रतियोगिताकाभावाप्रतियोगित्वरूपं भावनिष्ठव्याप्यवृत्तित्वस्य च विशेषणताविशे
षसंबंधावच्छिन्नप्रतियोगिताकाभावाप्रतियोगितात्मकत्वादत आह प्रतियोगिव्यधिकरणस्येति व्याचक्षुः। प्रतियो
गिव्यधिकरणत्वेन प्रतियोगिसमानाधिकरणभिन्नत्वं घटत्वेन किमपि प्रमेयं नास्तीति प्रतीतिसिद्धाभाव
मादाय साध्ये तत्सम नियताभावैक्यमते निरुक्तस्येवाभावस्य प्रमेयमात्रप्रतियोगिताकत्वाद् दृशाभावासिद्धेः ।।
नापि प्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरणत्वं संयोगिसत्त्वादित्यत्राव्याप्तेः व्यधिकरणधर्मावे
च्छिन्नाभावस्य तेनैव वारणे सामानाधिकरण्येन यस्य वैयर्थ्यापातात्। नापि यत्प्रतियोगिताश्रयासमानाधिकरणं साध्यतावच्छेदकसंबंधेन
हेत्वधिकरणं तदनवच्छेदकत्वं निरुक्तलक्षणार्थः वह्नित्वेन तृणादौ नास्तीति भाव प्रतियोगिताश्रयतृणादौ नाधि
करणधूमाधिकरणवृत्त्यभावीयता दृशप्रतियोगितावच्छेदकत्वाद् वह्नित्वस्याव्याप्तेरतः। सामानाधिकरण्येनेति
वाच्यं। गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्राव्याप्तेः। न च तत्र प्रतियोगिताविशिष्ट एव पर्यवसान
सत्तायामेवेति वाच्यं। मानाभावात्। तस्मात् दृशप्रतियोगितावच्छेदकविशिष्टप्रतियोग्यनधिकरणं यत्तद्धे
त्वधिकरणं [illegible]करणं तादृशप्रतियोगितानवच्छेदकत्वं वाच्यं। अत एव द्रव्यत्वाभाववान् सत्त्वादित्यत्र द्र
व्यत्वरूपाभावस्यैव नित्यत्वादिविशिष्टद्रव्यत्वाभावरूपप्रतियोगिसामानाधिकरण्येऽपि नाव्याप्तिः। द्र

तत्स्वत्ताद्दशप्रतियोगितावच्छेदकत्वात्

व्यत्वाभावत्वावच्छिन्नाधिकरणाधिकरणवृत्तित्वस्य हेत्वधिकरणे सत्त्वेन द्रव्यत्वाभावे भिन्नत्वस्य सत्त्वसिद्धे भावात् प्रतियोगि
तावच्छेदकविशिष्टप्रतियोग्यनधिकरणत्वं च प्रतियोग्यंशे प्रकारतापन्नतत्प्रतियोगितावच्छेदकविशिष्टप्रतियोग्य
शि॰टी॰भ॰ नधिकरणत्वं च प्रतियोग्यंशे प्रकारतापन्नतत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकप्रतियोगिमद्भे *वच्छेदकता*
दवत्त्वं भवति चैवं व्यधिकरणधर्मावच्छिन्नाभावोपि प्रतियोगिव्यधिकरणः धूमवति वह्नित्वेन घटो नास्तीति वह्नि *वच्छेदकता*
मत्यन्वेद्भित्वेन घटवान्नेति प्रतीतिबलेन प्रतियोगिप्रकारीभूतधर्मावृत्तिधर्मेणावच्छिन्नप्रतियोगिताकप्रति *दू*
योगिमद्भेदवत्त्वं भवति चैवं व्यधिकरणधर्मावच्छिन्नाभावोपि स्यभेदस्याभ्युपगमात् अत एव समवायितया
दोषघटक वाच्यत्वं वह्नौ मिश्रैः स्वीकृतः तथा च तादृशप्रतियोगितावच्छेदकतात्वह्नित्वादेरव्याप्तिरतः सामानाधिकरण्ये
तावह्नित्वेन वह्निधूमोभयनास्तीत्यभावप्रतियोगितावच्छेदकत्वपर्याप्तिस्त्वेन वह्नित्वे किंतु वह्निधूमोभ
यत्वेपीत्युक्तमतो नाव्याप्तिः तादृशप्रतियोगितायाः अन्यूनवृत्तित्वे सति यदवच्छेदकं तदन्यत्वं वक्तव्यं अवच्छेद
कपदधानाच्च महानसीयवह्न्यभावप्रतियोगितायाः अन्यूनवृत्तित्वेपि वह्नित्वस्य नक्षतिः इति तु केचित् ताद्दश
प्रतियोग्यनधिकरणत्वं च साध्यतावच्छेदकत्वं संबंधेन वाच्यो तेन ज्ञानवान् द्रव्यत्वादित्यादौ समवायेन
साध्यतायां नातिव्याप्तिः महाकालो घटवान् कालपरिमाणादित्यत्र कालिकसंबंधेन प्रतियोगिव्यधिकरणो घट
त्वेन पटाभाव एव महाकालो घटत्वेन न पटवानिति प्रत्ययादिति केचित्तु॥ साध्यतावच्छेदकसंबंधेन तादृशप्रति

प्रतियोगिभेदेन६

योगिताश्रयया दृशप्रतियोगितावच्छेदकविशिष्टोभयानधिकरणं त्वधिकरणं तादृशप्रतियोगितायाः सा
ध्यतावच्छेदकसंबंधसामान्येयदभावस्य तादृशप्रतियोगिताश्रयप्रतियोगिकत्वया दृशप्रतियोगितावच्छे
दकविशिष्टप्रतियोगिकत्वत्वेऽधिकरणीभूतयत्किंचिद्व्यक्त्यनुयोगिकत्वेनत्रितयाभावस्तादृशप्रतियो
गितायाअनवच्छेदकत्वं वाच्यं वह्नित्वावच्छिन्नतद्वृत्तिप्रतियोगितायावह्नित्वादेरवच्छेदकतयाऽव्याप्तेर्वारिणा
यसामानाधिकरण्येनेत्याहुः। तच्चिन्त्यं। प्रा। प्रतियोगिताभेदेवह्निमान्धूमादित्यत्र महानसीयवह्निनिष्ठाया
प्रतियोगितातदाश्रयवह्नित्वविशिष्टोभयानधिकरणत्वस्य धूमाधिकरणपर्वतादौ सत्वादुक्तरीत्यानवच्छि
न्नेवह्न्यभावस्यापि प्रतियोगिव्यधिकरणत्वादव्याप्तिः स्यात्। प्रतियोगिभेदेपि प्रतियोगितावच्छेदकैक्ये
नप्रतियोगितायाऐक्येतु वह्नित्वेन वह्निभिन्ने नास्तीत्यभावस्य वह्निभिन्ननिष्ठव्यधिकरणवह्नित्वावच्छि
न्नाएकैव प्रतियोगितासैव च वह्नित्वेन हृदोनास्तीत्यादिनापि प्रतीयते न तु हृदमात्रवृत्तिरन्या गौरवात् तथा
च वह्निभिन्नस्य यस्य कस्यचित् वह्नित्वावच्छिन्नस्य चेत् यस्यां प्रतियोगिवैयधिकरण्यमिति सामानाधि
करण्येनेति व्यर्थमेव स्यादिति। न च घटत्वेन वह्निर्नास्तीत्यभावप्रतियोगितायावैयधिकरण्येन घटत्वमे
वसर्वधूमाधिकरणमिव सामानाधिकरण्येन वह्नित्वमप्यवच्छेदकमित्यव्याप्तिरिति वाच्यं। मानाभावात्। प्रति
योगितावच्छेदकस्य यद्धर्मविशिष्टवृत्तित्वं तद्धर्मविशिष्टप्रतियोगिविषयकमेव व्यधिकरणधर्मावच्छिन्ना

४ धिकरणम् वसर्वधूमाधिकरणमिवव्यधिकरणधर्मावच्छिन्नाभावस्य ४

शि॰टी॰भ॰

भावमानतेन घटत्वेन प्रमेयं नास्तीत्याकारेण न घटत्वावच्छिन्नवत्त्वाभाववानमिति एवं चेति। तथा च व्यभिचार
स्य पारिभाषिकत्वेन निर्वचनेऽपि न क्षतिः तदीति।। पूर्याप्तित्वधीविशेषणविशेष्यभावानापन्नेति तदापन्ने च यथा व
ह्निघटौ न स्तः महानसीयवह्निर्नास्तीत्यत्र च प्रमेयवह्नित्वे द्वित्वे घटत्वे च परस्परविशेषणविशेष्यभावानाप
न्ने तात्पर्यासिः महानसीयवह्नित्वे तु विशिष्ट इति। विशिष्टवत्त्वाभावस्य महानसीयत्वविशिष्टवत्त्वाभावस्य
ननु विशिष्टस्यातिरिक्तत्वमते वह्नित्वमनवच्छेदकत्वमेवानतिरिक्तत्वमतेऽपि महानसीयत्ववह्नित्ववैशिष्ट्यमेव
परंपरासंबंधेन तदवच्छेदकमिति नोक्तदोष इत्यत आह। हृदत्वेति।। ननु हृदत्ववह्नित्वोभयाभ्यां वह्निर्ना
स्तीत्यभावस्य प्रतियोगितायां यत्तदुभयमवच्छेदकं तन्न सामानाधिकरण्येन तदुभयत्वावच्छिन्नप्रतियोगि
तावच्छेदकत्वाधिकरणावृत्तित्वात्। हृद्वह्नित्वस्य तत्सामानाधिकरण्येऽपि तस्यावच्छेदकत्वाघटकत्वात्। ल
क्षणे च तथैव विवक्षणात्। यद्वा हृदसामानाधिकरण्येनेति। चेन्न। तत्प्रतियोगितासामानाधिकरण्यांसच्छु
त तदवच्छेदकत्वं तदन्यत्वमात्रं स्यात्तौ उक्तदोषेण तथा विवक्षणात्। वस्तुतस्तु।। सामानाधिकरण्येनावच्छे
दकत्वविवक्षणेऽपि वह्निहृदोभयं नास्तीत्यभावे वह्नित्वहृदत्वादीनां सामानाधिकरण्येनैव प्रतियोगि
तावच्छेदकत्वात्तदभिप्रायको ग्रंथः।। ननु संयोगित्वसत्त्वादि यत्रातिव्याप्तिः संयोगाभावस्याव्याप्यवृत्तित्वयाव्याप्य
वृत्त्यभावप्रतियोगितानवच्छेदकत्वात् संयोगत्वस्येत्यत आह। सत्त्ववतीति। व्याप्यवृत्तिरिति। तथा च हेत्वधिकर

रूपावच्छेदकद्वयावच्छिन्नप्रतियोगितामात्रे दायसंगतिरित्यरुचेस्तथैवाह॥ वह्नित्वेनेति॥
जलत्वादेवच्छिन्नेन किमपि प्रमेयं नास्तीति प्रतीत्या प्रमेयमात्रस्यैव प्रतियोगित्वावगाहनादि
ति भावः॥ ननु प्रमेयवान् वह्नेरित्यत्रोक्ताभावो न साधनसमानाधिकरण इत्यत आह॥ अवृ
त्तीति॥ गगनत्वस्यापि कालिकसंबंधेन घटादिवृत्तित्वादाह॥ अवृत्तिमात्रवृत्तीति॥ तथा चावृ
त्तिमात्रवृत्तितानियामकसंबंधप्रतियोगितावच्छेदकीकृत्य तथाभावो ग्राह्य इति भावः॥ गग
नत्वेन किमपि प्रमेयं नास्तीति प्रतीतिसूचनायोक्तं॥ गगनत्वादिनेति॥ ननूक्तप्रतीत्या प्रमेय
मात्रस्य प्रतियोगित्वावगाहनं न सर्वजनसिद्धं॥ तथात्वेपि वा प्रमेयवान् वाच्यत्वादित्यादौ व
ह्नित्वद्रव्यत्वादिनानाधर्मावच्छिन्नप्रतियोगिताकाभावसमुदायाधिकरणाप्रसिद्ध्याऽव्या
प्तिमन्येन स्वन्यूनवृत्तिस्वसमानाधिकरणधर्मानवच्छिन्नप्रतियोगितायाः साध्यताव
च्छेदकसमनियतत्वं विवक्षणीयमवश्यं तथा च कथमेवं विधाभावमादाय लक्षणगम
नमत आह॥ विरुद्धेति॥ घटत्वपटत्वोभयोरपि कालिकसंबंधेन समानाधिकरण्य

तावच्छेदक

सत्वदात्॥ विरुद्धेति॥ विरोधिता नियामकस्य समवायादेः प्रतियोगितावच्छेदकत्वप्रापकत्वो॥
इदमुपलक्षणं॥ घटत्वादिकमपि संयोगेन मेयसामान्याभावप्रतीतौ तेन संबंधेन घटत्वा
शि॰टी॰ग॰ वच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावोपि बोध्यः। पारिभाषिकमेवोच्येव कारे
पयोगार्थानादरः। यदिति॥ यत्स्वदं हेतुतावच्छेदकावच्छिन्ना हेतुपरा तेनाथमामाद्य
घटान्यत्वे सति आत्मघटसंयोगादिस्यत्रहेतुसमानाधिकरणस्यात्मत्वाद्यभावस्य
स्वविशिष्टहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणाप्रसिद्ध्याऽव्याप्तिः। नच ज्ञानादि
वृत्तेरात्मत्वाद्यभावस्यापि स्वाश्रयसमवायादिसंबंधेन आत्मवृत्तित्वा स्वविशिष्ट
हेत्वधिकरणस्य नाप्रसिद्धिरिति वाच्यं। विशिष्टप्रतीति नियामकविशेषस्यैव संबं
धत्वोक्तेः। नच तेन संबंधेन आत्मन्यात्मत्वाभावविशिष्टधीरस्ति। अतएव स्फटि
कादिभिन्नेसन्नपि लौहित्यस्य स्वाश्रयसंयोगेन संबंधः। किंतु स्फटिकादावि
वेति एतत्तेनैककालीनत्वैकज्ञानविषयत्वादीनां संबंधेन सर्वस्यैव सर्वत्र संबंध
त्वात्। यत्समानाधिकरणा इत्यस्य वैयर्थ्यमिति। प्रकृतं। ननु साध्यसमान

धिकरण्या इति कथं नोच्यते सत्तावान् आत्मत्वात् प्रमेयवान् आत्मत्वादि साधौ गुणकर्मान्यत्व
विशिष्टसत्ताभावस्य समवायावच्छिन्नप्रमेयाभावस्य च तादृशस्य स्वविशिष्टहेत्वधिकरणा
प्रसिद्ध्या व्याप्तिरिति भवोक्तं अत्र साध्यनिष्ठव्याप्यतासंबंधसामान्येन वाच्यो। न च समवा
येन ज्ञानसाध्यके द्रव्यत्वादिति हेतावतिव्याप्तिः। विषयतया तस्य केवलान्वयित्वेन केवलान्व
यिनिष्ठप्रतियोगितायाएव तद्व्यापकतावच्छेदकत्वेन तादृशाभावस्य प्रतियोगिसमानाधि
करणत्वादिति वाच्यं। प्रतियोगिसमानाधिकरण्यदले साध्यतावच्छेदकसंबंधेन साध्यनिष्ठ
व्याप्यतानिरूपितव्यापकताघटकयावत्संबंधेन प्रतियोगिसामानाधिकरण्यस्यावश्यं वि
वक्षणीयत्वेनैवानतिप्रसंगात्। समवायेन ज्ञानादिव्यापकस्य ज्ञानादेरभावस्य समवाये
न हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावात्॥ यदि च संयोगसमवायसा
धारणसंबंधत्वं नैकमन्यतमत्वेन तादृशसंबंधानां प्रवेशे गौरवंथे किंचित्संबंधेन साध्यनि
ष्ठव्याप्यताभिधाने चायमामाशीनादि स्वत्रकालिकसंबंधेनात्मत्वस्य व्यापकत्वेन्यमताकाक्षा।

सि॰ दी॰ ११

न्यतरत्वं तदभावस्य हेतुसमानाधिकरणस्य प्रतियोगिनः सामवायेनाभावव्याप्यतानिरूपित
व्यापकताघटकसंबंधाप्रसिध्याऽव्याप्तिरिति विभाव्यते तदा साध्यतावच्छेदकसंबंधेन साध्यनिष्ठ
व्याप्यता बोध्या। एवं च साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकावच्छेदकावच्छिन्नसाध्यवृ
त्तित्वाभावप्रतियोगितानवच्छेदिका यदभावप्रतियोगिता तादृशाभाव इत्यर्थः तेन गुणकर्मान्य
त्वविशिष्टसत्तावान् जातेरित्यादौ द्रव्यत्वाद्यभावस्य तादृशप्रतियोग्यसमानाधिकरणत्वान्नाति
व्याप्तिः। धूमवान् वह्नेरित्यादौ तु धूमाभावप्रतियोगितायाः स्वरूपसंबंधात्मकतत्तद्व्यक्तिस्व
रूपायाः धूमव्यापकतानवच्छेदकत्वेपि अयोगोलकान्यत्वाद्येकव्यक्तिनिष्ठप्रतियोगिताया
व तथात्वात् अयोगोलकान्यत्वाभावादेः प्रतियोग्यसामानाधिकरण्यादेव नातिव्याप्तिः वे
द्विमान् धूमादित्यादौ च घटत्वावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावमादाय लक्षणासम
न्वयः। घटत्वावच्छिन्नद्रव्यत्वाभावप्रतियोगित्वेन पटो नास्तीत्यादिक्रमेण प्रतियोगितामा
त्रस्यैव व्यधिकरणतया साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वेन साध्यवन्निष्ठाभा
वप्रतियोगितानवच्छेदकप्रतियोगिताया अप्रसिद्धेर्वारणाय साध्यवन्निष्ठाभावे प्रतियो

गिव्यधिकरणत्वं देयं। तदर्थश्च न प्रतियोगिसमानाधिकरण्याभिन्नत्वं गोत्वाभावादेरपि गोत्वेन कमपि
प्रसेयं नास्तीति प्रतीतिसिद्धाभावसमन्ने यत्केनतदात्मकतया प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः॥
नापि प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणाभिन्नत्वं वदा। व्यापकत्वस्य संबंधविशेषानियं
त्रिततयायेन संबंधेन प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणाभिन्नस्य साध्यवन्निष्ठा
भावस्य प्रतियोगितानवच्छेदिका प्रतियोगिता स एव व्यापकतावच्छेदकघटकसंबंधो वाच्यः। स
तथा च संयोगेन द्रव्यत्वमपि वह्निव्यापकं स्यात्। वह्निमन्निष्ठस्य संयोगेन द्रव्यत्वाभावस्य तेन सं
बंधेन द्रव्यत्वाधिकरणाप्रसिद्ध्या प्रतियोगिवैयधिकरण्याभावात्तथा च तेन संबंधेन द्रव्यत्वाद्य
भावस्य प्रतियोगिसामानाधिकरण्याभावादसंभव इति। न च संयोगेन स्वप्रतियोगितावच्छे
दकावच्छिन्नसमानाधिकरणं यद्यत्तद्भिन्नत्वं संयोगेन द्रव्यत्वाभावे वर्त्तत एवेति वाच्यं। संयोगे
न द्रव्यत्वाभावस्यापि घटत्वेन वह्न्यभावाभिन्नतया घटत्वावच्छिन्नसमानाधिकरणत्वेन तद्भि
न्नत्वाभावात्। नन्वेवं संयोगेन द्रव्यत्वाभावस्यापि वह्निरूपप्रतियोगिसमानाधिकरण्या

भासंभव इति वाच्यं। एवमपि सत्तावान् जातेरित्यत्राक्रमेणासत्तां प्रत्यपि संयोगेन द्रव्यत्वादेः व्यापकत्वे
तदभावस्य गुणादौ ऽधिकरणे संयोगेन प्रतियोगिसामानाधिकरण्याभावाद्व्याप्तेः व्यापकत्वस्य
शि॰टी॰११ मिमतस्य तेन संबंधेन वृत्तिमत्व विवक्षयोपि संयोगादेरपि सत्ता प्रतिव्यापकतया गुणादौ तदभाव
स्य प्रतियोगिसामानाधिकरण्याभावात् सत्तावान् जातेरित्यत्राव्याप्तेरपरिहारात्। तस्माद्यत्संबंध
सामान्ये यादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्व साध्यवत्यत् किंचिदवृत्त्यनुयोगि
केवोभयाभावस्तत्प्रतियोगितावच्छेदकभिन्नायायेन संबंधेन यादृशप्रतियोगितावच्छेदकवि
शिष्टानधिकरणं यत्साध्याधिकरणं तादृशप्रतियोगितावच्छेदकभिन्नातेन संबंधेन वृत्तिमन्नि
ष्ठाभावीयाप्रतियोगितासातेन संबंधेन व्यापकतावच्छेदिका॥ वस्तुतस्तु॥ साध्यवन्निष्ठाभावप्रति
योगिता यायत्संबंधावच्छिन्नायाः सामानाधिकरण्येनानवच्छेदिका याप्रतियोगितासातेन संबं
धेन तथेति वाच्यं साध्यवन्निष्ठत्वं चाभावस्य दैशिकविशेषणता विशेषणतेनायं घटयत दृष्टपत

न्यतरत्वादिरूपादौ व्यभिचाराधिकरणे तत्घटान्यत्वादेरभावस्य कालिकसंबंधेन घटे वृत्तावपि नैतद्घटान्यत्वस्य घटत्व
व्यापकत्वक्षतिः ॥ अनवच्छेदकत्वं चावच्छेदकत्वावच्छिन्नावच्छेदकभेदः तेनावच्छेदकत्वेन घटादिनिष्ठप्रतियोगिता
यां घटादिभेदवत्वेपि न क्षतिः ॥ नन्वेवं घटत्वावच्छिन्नद्रव्यत्वाभावप्रतियोगितायां द्रव्यत्ववृत्तित्वं न स्यात् इति प्रतीति
सिद्धाभावप्रतियोगितायाः सामानाधिकरण्येनैवावच्छेदकत्वात् तादृशप्रतियोगितानां कथं व्यापकतावच्छेदक
त्वमिति वाच्यं। अवच्छेदकपदेनावच्छेदकतापर्याप्त्यधिकरणस्य विवक्षणात्। तत्त्वं यत्किंचिन्ने प्रकृतप्रतियोगितायां ॥
अन्यथा तादृशप्रतियोगितावच्छेदकावच्छिन्नद्रव्यत्ववति तदभावप्रत्ययप्रसंगात् किंतु तत्प्रतियोगितायां द्र
व्यत्ववन्निरूपितद्वित्वं चेति ध्येयं। यथा चैवं स्वविशिष्टपदं व्यर्थं तथा तत्रैव प्रपंचयिष्यते। यावत्त्वं दर्शिना ऽतिव्या
प्तिरेव भवति नाव्याप्तिः संभवो वेति प्रदर्शयितुमाह। सर्वत्रेति ॥ सर्वत्र सर्वाधिकरणावच्छेदेन तथा च स्ववि
शिष्टत्वेऽधिकरणावच्छेदेनेत्यस्यापि सत्वं प्रदर्शितमिति सर्वत्र व्यभिचारिणीत्यर्थः। तथात्वात् ॥ प्रतियो
गिसमानाधिकरणत्वात् ॥ ननु ॥ साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावः। साध्यतावच्छेदक
व्यापकप्रतियोगिताकाभावो वा कथं नोक्त इत्यत आह। अत एवेति ॥ निरुक्ताभावे यावत्वविशेषणादेवान
नु ॥ भूतलत्वं बहिरिन्द्रियग्राह्यजातीयविशेषगुणवत्वं तस्य चोत्पत्तिकालेन घटादावभावात्प्रतियोगिव्य

शि॰टी॰॥

धिकरणत्वाघटितं साध्यव्यापकत्वं न संभवतीत्यत आह॥ भिन्नोन्यत्वेति। किंतु॥ साध्याप्रतियोगिकमभावमादाया

पिन्नातिव्याप्तिरिति केचिन्नु तन्न्यायेनाह भिन्नोन्यत्वेतीत्याहुः॥ गोत्वाभावस्य साध्याभावत्वेन नैव वारणादाह॥

तत्र साध्येति॥ वह्निमान् धूमात्। लातिमान् सत्वादित्यादौ तत्र वह्न्यभावस्य तत्तदभावस्य वा स्वविशिष्ट

हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावादव्याप्तिरित्यर्थः॥ साध्यतावच्छेदकावच्छिन्न

व्यापकप्रतियोगिकेत्यत्रावयितथा। तत्र वह्नेः प्रमेयत्वादिनावच्छिन्नावच्छिन्नव्यापकत्वात्। नच तत्तत्प्रति

योगितानां प्रमेयत्वादिनाव्यापकतावच्छेदकत्वमिति। मपि। तादृशाभावप्रतियोगितावच्छेदकेत्तत्वाभावस्य

केनापि रूपेणासंभवादिति। वह्निमान् धूमादित्यत्र चरमक्रियाद्यभावस्याभावस्य धूमाधिकरणमहा

कालवृत्तेर्निरुक्तरूपशालिनः चरमक्रियाद्यात्मकस्य परमाणुमहाकालादेः संयोगेन धूमाद्यधिके

रणत्वसंभवे स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यसंभवादाह॥ चेत्साध्ये इत्य

क्तं। नच परमाण्वादिकं न संयोगेन धूमाद्यधिकरणं तत्संयोगस्य वृत्त्यनियामकत्वादिति वाच्यं॥ परमा

णौ धूम इत्याद्यानुमानिकप्रतीतिसत्त्वात्॥ नचानुमानमप्रयोजकमिति वाच्यं॥ तथाप्यर्थस्य निर्ण

येतद्धारकविशेषणदानानौचित्यादिति केचित्तु॥ अत्र साध्याभावस्याव्याप्यवृत्तेः प्रतियोगिसामाना

धिकरण्यस्य सत्वात् मादायनाव्याप्तिः । संभवती यामते साध्ये इत्यत्क मित्याहुः । ननु स्फुरत्ववान् आत्म महा
कालान्यतरत्वादित्यत्राव्याप्तिः सर्वेषामेव तादृशाभावानां स्वविशिष्टहेत्वधिकरणीभूत महाकालावच्छे
देन कालिक संबंधेन प्रतियोगि सामानाधिकरण्यात् । न चात्मनोपि तादात्म्येन स्फुरत्व व्यापकतया
आत्माभावस्यापि तादृशत्वात् तस्य च काले आत्म सामानाधिकरण्याभावान्नाव्याप्तिरिति वाच्यं
आत्मनोपि कालवृत्तिस्य नियामक कालिक संबंधेन सत्वात् । अन्यथा आत्मादीनां सदा नैत्यकारणत्वादि
कं न स्यात् तस्य कालवृत्तित्व संघटितत्वात् । एवमपि स्फुरत्ववान् आत्मघटान्यतरत्वादित्यत्राव्याप्तिः ॥
अत्र घटादौ संयोगेनात्मनोवृत्तेः इत्यत आह । दलांतरेपीति ॥ साध्यतावच्छेदक संबंधेन साध्यतावच्छे
दकावच्छिन्न साध्य निष्ठ व्याप्यता निरूपित व्यापकता घटक संबंध प्रतियोगि सामानाधिकर
ण्य घटक संबंधयोरैक्य विवक्षायामयमर्थः तेन धूमवान् धूमकालीन वह्नेरित्यादौ अयोगोलकका
न्यत्वाभावादरेपि संबंध सामान्येन धूम निष्ठ व्याप्यता निरूपित व्यापकता घटकेन संबंध साम
न्येन एवं यत्किंचित् संबंधावच्छिन्न व्याप्यता निरूपित व्यापकता घटकेन कालिकादि संबंधेन वा ॥

स्वविशिष्टहेत्वधिकरणावछेदेनप्रतियोगिसामानाधिकरण्यसत्वेपिनातिव्याप्तिर्नवाविशिष्टसत्ता
वद्गुणवत्वादित्यादौविशिष्टसत्ताव्यापकतावछेदकप्रतियोगिताकस्यद्रव्यत्वाभावस्यकालिकसंबं
शि॰टी॰१ धेनहेतुसमानाधिकरणस्यप्रतियोगिनिद्रव्यत्वेस्वरूपसत्तानिष्ठव्याप्यतानिरूपितव्यापकताघ
टकसंबंधाप्रसिध्याऽव्याप्तिः।वस्तुतस्तु।।साध्यतावछेदकसंबंधेनसाध्यतावछेदकविशिष्ट
साध्यवन्निष्ठाभावीययत्‌यत्संबंधावछिन्नप्रतियोगितानवछेदकप्रतियोगिताकायेयेऽभा
वास्तेतेनयेनतेनप्रतियोगिसमानाधिकरणाइत्यर्थात्‌।व्यापकताघटकतेनसंबंधानांनप्रवेश
इति।यत्‌यत्संबंधेतिकरणाच्च।इदमीश्वरशीनंईश्वरेसविषयकत्वादित्यत्रव्यभिचाराधिर
णीभूतेघ्राणेन्द्रियेवादेविषयितयादैशिकविशेषणतयाचेश्वरशीनत्वव्यापकत्वेनतदभावस्येछा
यांव्यापकताघटकविषयितयाप्रतियोगिसामानाधिकरण्येपिदैशिकविशेषणतयाऽत
थात्वान्नातिप्रसंगइति।साध्यतावछेदकसंबंधेनव्यापकतातेनैवप्रतियोगिसामानाधिकर
ण्यमित्यस्यकौन्वसर्वत्रवान्वयत्वाद्यभावस्येतिग्रंथविरोधः।यत्रमहाकालान्यत्वविशिष्टघट

त्वं कालिकतया साध्यं कालत्वादितिहेतुसत्त्वतादृशाभावानां कालिकसंबंधेन महाकाले प्रतियोगिसामानाधिकरण्याद्व्याप्ति
र्न स्यात्। अस्मद्विवक्षायां तु महाकालान्यत्वस्य देशिकतयापि साध्यव्यापकत्वात्तदभावस्य तेन संबंधेन महाकाले प्रति
योगिसामानाधिकरण्याभावान्नातिव्याप्तिरिति। वस्तुतस्तु॥ महाकालान्यत्वे घटत्वमपि महाकाले कालिकतया वर्तत
इति व्यवस्थापयिष्यते तथा च एतद्रूपान्यत्वविशिष्टसत्तावान् सत्त्वादित्यादौ समवायेन साध्यतायां उक्तक्रमेणातिव्याप्ति
र्द्रष्टव्या। केचित्तु। प्रतियोगितावच्छेदकसंबंधेन व्यापकतातेनैव प्रतियोगिसामानाधिकरण्यं समवायेन वह्निव्याप
कतावच्छेदकसंयोगेन द्रव्यत्वप्रतियोगिताकस्यापि द्रव्यत्वाभावस्य प्रतियोगितावच्छेदकसंयोगेन द्रव्यत्वसमानाधि
करणत्वाद्व्याप्तिरतस्तेन संबंधेन व्यापकत्वमुक्तं न चैवं वाच्यं। प्रमेयत्वादित्यादौ प्रतियोगितावच्छेदकसंबंधेन साध्य
व्यापकतावच्छेदकप्रतियोगिताकस्याभावस्याप्रसिद्धिः। व्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदक
संबंधस्वीकारे मानाभावेन घटत्वेन वाच्यत्वाद्यभावस्य तथात्वादिति वाच्यं वाच्यघटे समयाभावस्य घटादिवृत्ति
त्वविशिष्टवाच्यत्वाद्यभावस्य घटादिवृत्तित्वविशिष्टवाच्यत्वाद्यभावस्य वा तादृशस्य प्रसिद्धिरिति। न चैवं व्यधि
करणधर्मावच्छिन्नाभावं विनैकलक्षणसमन्वये प्रतियोग्यवृत्तिश्चेत्यादेरवतार न स्यादिति वाच्यं। व्यापकताल
क्षणे व्यधिकरणधर्मावच्छिन्नाभाववारकस्य सामानाधिकरण्येनेत्यादिविशेषणस्य तदभ्युपगममंतरे
णावैयर्थ्यापत्त्या प्रतियोग्यवृत्तिश्चेत्यादेरवतारस्योभयसमाधेयत्वादिति। वस्तुतस्तु॥ व्यधिकरणधर्मावच्छि
न्नाभावस्यापि प्रतियोगितावच्छेदकसंबंधोऽनुभवबलादास्थीयते। कथमन्यथा घटत्वस्य घटे भ्रमदशा।

यां पटत्वविशिष्टघटसंयुक्तत्वेन यदा भूतलं प्रतीयते तदा भूतले पटत्वेन घटो नास्तीति धीः संयोगेन न भवति न्वस
मवायेनेति उपपद्यते चेति। अत एव प्रमेयत्वत्वेन वाच्यत्वं नास्तीत्यभावस्यापि प्रमाविषयत्वीयस्वरूपसंबंधाव
च्छिन्नतया द्वितीयलक्षणस्यापि संगतिः। अन्यथा विशिष्टवाच्यत्वाभावमादाय पूर्वलक्षणोपपादनेपि द्वितीय
॰टि॰टी॥ लक्षणस्याप्रतिकारादित्याहुः। परे तु विशेषणताविशेषेण व्यापकतातेनैव च प्रतियोगिसामानाधिकरण्यं॥
विशेषणताविशेषस्वाभावीयः प्रमाविषयत्वीयो वा वाच्यं। व्यभिचारित्वव्यभिचारिनिरूपकाधिकरणांयत्व ॥॰
तदन्यत्वस्य तत्प्रकारकप्रमाविषयत्वस्य वाऽभावमादाय नातिव्याप्तिः। अव्याप्यवृत्ति प्रमाविषयत्वमव्याप्यवृत्ये
वेतेन स्वविशिष्टपदस्य न वैयर्थ्यं। सत्तावान् जातेरित्यादौ सत्ताद्यप्रकारकप्रमाविषयत्वस्य गुणकर्मान्यत्वविशि
ष्टस्याभावे हेत्वधिकरणवृत्तित्वावच्छेदेन प्रतियोगिसामानाधिकरण्याभावाच्च न तत्र दोष इत्याहुः। अत्र न द्रव्यस
मवायित्वं न द्रव्यत्वाभावस्य विशिष्टाभावात्मकतया धूमवान् वह्नेरित्यत्र धूमविशिष्टस्य संयोगेनाभावात्म
कतया धूमाभावस्यायोगोलकान्यत्वविशिष्टस्य गोलाभावस्याभावात्मकतयाऽयोगोलकान्यत्वाभावस्य
वा मतिव्याप्तिवारणाय व्यापकतावच्छेदिकायाः प्रतियोगितायाः प्रसक्तेः तदाश्रयसामानाधिकरण्यं वा
व्यमिति कश्चित्। तन्न। लक्षणादिवृत्तित्वविशिष्टेत्यादिग्रंथविरोधात् साध्यतावच्छेदकावच्छिन्नेत्यादिव्यर्थता
चा समनियताभावानैक्यमते एवमिदमिति नोक्तातिव्याप्तिरिति ध्येयं। नञ्। रूपसामान्याभाववान् पृ
थिवीत्वादित्यत्र आपातेति विरुद्धोतिव्याप्तिः। पृथिवीत्वादेः स्वमते रूपसामान्याभावव्यापकतया तद्

भावमादायातिव्याप्तिवारणासंभवात्। अतस्तत्रालक्ष्यताभावमुपपादयति रूपेति। केचित्तु। साध्यतावच्छेदकाव
च्छिन्नसाध्याभावे स्वकृते भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यत्रैव रूपसामान्याभाववान् पृथिवीत्वादित्यत्राप्यति
व्याप्तिः। स्यात् रूपसामान्याभावाभावस्य विशिष्टहेत्वधिकरणावच्छेदेन तत्तद्रूपविशेषप्रागभावाध्वं
सादिरूपस्य प्रतियोगिसामानाधिकरण्यात्। अत एव किं नोदाहृतं अतस्तस्यालक्ष्यतामेवाह। रूपेतीति
व्याचक्षुः। अविनश्यद्द्रव्यस्य स्थैर्यरूपस्य रूपप्रतिबन्धकतोपगमे रूपनाशोत्पत्तिकालावच्छेदेनैवोत्तररूपो
त्पादात्तस्य क्षणिकत्वे परमाणौ रूपसामान्याभावासंभवादाह। अलक्ष्य इति। महाप्रलय इत्यर्थः। परमाणौ पा
र्थिवपरमाणावसत्वात् तद्रूपसामान्याभावसत्वात् प्रतियोगिवदिति षष्ठीसमर्थाद्वतिः। तत् ध्वंसप्रागभावयोः
प्रतियोगिध्वंसप्रागभावयोः। ननु। अलक्ष्ये रूपसामान्याभावसत्वे मानाभावः प्रत्यक्षस्यासंभवात् अनुमा
नस्याप्रयोजकत्वात् अत्यन्तध्वंसप्रागभावप्रतियोगिकातिरिक्तात्यन्ताभावकल्पने गौरवप्रतिकूलतर्कप्र
तिकूलसत्वाच्च। एवमुत्पत्तिकालावच्छेदेन तत्सत्वे मानाभावः। प्रत्यक्षस्य इन्द्रियसंयुक्तविशेषणताविरहे
णासंभवात्। न च कपालसमवेतरूपादौ अभावप्रत्यक्षे इन्द्रियसंयुक्तसमवेतविशेषणतायाः हेतुत्वम
स्तु। तस्याः अनुत्पत्तिकालावच्छिन्नघटेपि सत्वमिति वाच्यं। द्रव्यरूपस्याभावप्रत्यक्षे संयुक्तविशेषणतायाः अ
पि आश्रयरूपाभावस्य हेतुत्वेन विनिगमनाविरहेणोभयहेतुतायामपि प्रकृतासिद्धेरत आह। अत ए
वेति। ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे मानाभावादेवेत्यर्थः। अन्तरास्वगमे पूर्वापरकालयोरन्तर्मध्यद

शायांशामे इत्यर्थः ध्वंसप्रागभावयोः सामान्याभावत्ववादिमतेपि यत्किंचिद्विशेषप्रागभावयत्किंचिद्विशेषध्वंसवतित
दसंभव इत्यस्य सूचनार्थं अंतराश्यामत्वपर्यंतावनुधावनं ॥ एष रक्तो रूपं नास्तीति प्रत्ययः ध्वंसादीति ॥ आदिनात त्प्रागभा
वपरिग्रहः ॥ पूर्वापरेति पूर्व रक्तिमत ध्वंसवति अस्य रक्तिमप्रागभाववतीत्यर्थः । तथाप्रत्ययेति । रक्तो रूपं नास्तीति
शि॰टी॰ ११ विलक्षणविषयताशालिप्रत्यय इत्यर्थः । न च तत्र रक्तरूपवत्ताज्ञानं तेव प्रतिबंधकं तदज्ञाने जायमानायाः प्रती
तेः प्रमात्वापातात् । न च तत्र रक्तरूपवत्ताज्ञानमेव प्रतिबंधकं रक्तत्वाद्यवच्छिन्नप्रतियोगिताकध्वंसे एव अव्याप्यवृ
त्तीति रक्ततादशायां ध्वंसे तदसत्वादेव न तथा प्रत्यय इति वाच्यं प्रागभावे एवं तदव्याप्यवृत्तिर्नस्यादित्यत्र विनिगमका
भावात् ॥ न चोभयत्रैव तदस्तु तथापि तत्तत्ध्वंसप्रागभावसमनियतस्य श्यामादिध्वंसप्रागभावादीनामपि विनिगम
नाविरहेण तत्कल्पनापत्तेः तथा चानंतानां ध्वंसप्रागभावादीनां रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्य तदव्याप्यवृत्तित्व
स्यांतराश्यामे रक्तं रूपं नास्तीति प्रतीतेरनेकध्वंसादिविषयत्वस्य च कल्पनामपेक्ष्य रक्तत्वावच्छिन्नप्रतियोगिताको
यंताभावस्यैवानुरागे श्यामादौ संबंधः कल्प्यते लाघवादित्येतत्सूचनायाप्युक्तं । अंतराश्याम इति । स्वविशिष्टेति ।
येत्राभावे प्रतियोगिसामानाधिकरण्यं तत्राप्यंतदेवस्वं तद्विशिष्टं यद्धेत्वं तु तावच्छेदकसंबंधेन हेतुतावच्छेदक
विशिष्टहेत्वधिकरणं तदवच्छेदेनेत्यर्थः । तेन वह्निमान् धूमादित्यादौ कालिकसंबंधेन धूमाधिकरणक्रियावच्छे
देन घटत्वेन द्रव्यत्वाद्यभावस्य प्रतियोगिसामानाधिकरण्याभावेपि न क्षतिः । न वा द्रव्यं विशिष्टसत्वादित्यत्र घ
टवृत्तित्वविशिष्टद्रव्यत्वाभावस्य च निरक्तरूपशालिनः स्वविशिष्टसत्ताधिकरणगुणादौ द्रव्यत्वरूपप्रति

याप्तिसामानाधिकरण्यविरहेऽपि क्षतिरिति। धूमवान्वह्नेरित्यत्र धूमाधिकरणयावत्ध्वंसानंतरं वह्न्यधिकरणोत्प
त्तिसंभावनायां चरमधूमाधिकरणध्वंसस्य कालिकतया यदधिकरणं देशिकतया च यदधिकरणं तदन्यतरस्या
वच्छिन्नभेदस्य देशिकतया धूमे व्यापकस्याभावे चरमधूमाधिकरणध्वंसात्मके व्यापकताघटके देशिकतया
स्वप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिनिर्णयः संभवतीति तदुपेक्ष्यात्। गोत्व इति। पर्वतादेः कालि
याधिकत्वास्वीकारेऽयोगोलकान्यत्वाद्यभावस्य पर्वतावृत्तित्वात् तत्रातिव्याप्तिर्न संभवतीति तन्नोक्तमिति केचित्तु
सर्वत्रैव साध्यता कालिकसंबंधेन गोः साध्यतायां तद्व्यापकतावच्छेदकरूपावच्छिन्नाभावमादायापि नातिव्याप्तिवा
रणं संभवतीत्येतत्प्रदर्शनाय तेन तेन रूपेण साध्यतामाह। जन्यद्रव्यत्वेति। व्यभिचारित्वसंपादनाय तज्जन्ये
ति। तद्वति गवादिमति काले गवाद्यनवधिकरणध्वंसव्यवच्छेदेन गवादेरभावस्य वृत्तावपीति योजनादेशिकतया
प्रतियोगिनोऽधिकरणे देशे देशिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्य देशिकतया वृत्तौ कालिकतया प्रति
योग्यनधिकरणकालस्यैव कालिकतया वृत्तौ देशिकतया प्रतियोग्यनधिकरणदेशस्यावच्छेदकत्वात् इदा
नीं गौर्नास्तीति प्रत्ययात् न तु तस्यैतत्कालावच्छेदेन तद्देशे गवाद्यत्यंताभावो विषयः। यद्देशे देशिकतया कदापि
न गौस्तत्रापि तथा प्रत्ययात्। तत्रैव देशिकतया गवाद्यभावस्याव्याप्यवृत्तित्वेनैव तत्कालस्यावच्छेदकत्वाकल्प
नादिति यत्तु। प्रतियोगिनोऽधिकरणे कालिककालिकसंबंधावच्छिन्नप्रतियोगिताकाभावस्य कालिकतया वृत्तौ प्रति
योग्यनधिकरणदेशोऽवच्छेदक इति। तत्तुच्छं विरोधितानियामकसंबंधेन वृत्तावेवावच्छेदकानुसरणात्।

।टी०।
व्या०।१०

विरोधिता नियामकस्याभावस्य दैशिकविशेषणता विशेषत्वं । अन्यथा घटवति भूतले घटाभावस्य कालिकतया वृत्तावव्य
वच्छेदकत्वं स्यादिति । साध्यव्यापकचरमध्वंसप्रतियोगिकाभावाभावस्य चरमध्वंसात्मकस्य स्वविशिष्टकालप्रतियोगिसा
मानाधिकरण्याभावादाह । महाकाले चेति । तादृशध्वंसस्य महाकाले कालिकसंबंधेन वृत्तेः अभावस्य च वृत्तौ संबंधवि
शेषो न विवक्षित इति भावः । परंतु अभावस्य दैशिकविशेषणताविशेषविवक्षायामपि प्रलयावृत्तित्वरूपे वा सा
ध्यतायामतिव्याप्तिस्तदवच्छिन्नाभावस्य प्रलयमात्रवृत्तेर्महाप्रलयात्मकतया स्वप्रतियोग्यधिकरणेपि दैशिक
तया वृत्तेः नच प्रलयावृत्तेः । कालिकतयाभावस्याकाशादिवृत्तेः कथं प्रलयात्मकत्वमिति वाच्यं । प्रलयभेदस्यापि
प्रलयावृत्तितया विशेषणताविशेषणतदभावस्य प्रलयमात्रवृत्तित्वात् अतएव दैशिकविशेषणताकालिका
दिसाधारणस्य संबंधत्वस्यैकस्याभावास्वदन्यतमत्वस्य प्रवेशोचाति गौरवात् । अभावस्य दैशिकविशेषण
तैव निवेशनीयेत्यभिप्रेत्य प्रलयमात्रव्यभिचाराधिकरणं । प्रतिपादयितुं प्रलयावृत्तित्वं साध्यं निर्दिष्टवान् ।
पूर्वं साध्यद्वयं कालिकेन चरमेतु दैशिकविशेषणताविशेषेणेति । नच प्रलयान्यत्वाभावोपि न प्रलयात्मा
अन्यथा तस्य चरमदुःखादिध्वंसरूपतया आत्मादावपि वृत्तेस्तत्रापि प्रलयान्यत्वाभावप्रसंगादि
ति वाच्यं । स्वरूपतस्तस्यात्मादौ वृत्तावपि प्रलयान्यत्वाभावत्वविशिष्टस्य तस्मिन्नेव वृत्तेः । प्रतिबन्धेन तथै
व कल्पनात् । अन्यथा तस्यातिरिक्तत्वे तत्तदन्यत्वाभावस्यापि तथात्वादनवस्थाऽस्यात् । अतएव नबोधाधि
कारेऽभावाधिकरणकाभावप्रसंगेनिवस्थाचक्रकान्योन्याश्रयापेक्षयाऽऽत्माश्रयस्यैव लघुत्वात्

वदीधितिकृतास्वीकृत इति प्राहुः। संयोगसामान्याभावस्य द्रव्ये आचार्यमस्वीकारादाह। कपीति। घटितसंयोगाभाव
स्यापि संयोगाभावव्यापकत्वमित्यर्थः। प्रतियोगिवैयधिकरण्याघटितव्यापकतायामपि संयोगाभावव्याप
कस्याकाशाभावस्य द्रव्यमात्रमस्वीकारादाह। कपीति। प्रतियोगिवैयधिकरण्यघटितसंयोगाभाव
स्यापि संयोगाभावव्यापकत्वमित्यर्थः। प्रतियोगिवैयधिकरण्याघटितव्यापकतायामपि संयोगाभावव्या
पकस्याकाशाभावस्याभावे आकाशे एवं मेयसामान्यस्य समवायेनाभावे मेयत्वावधिकरणावच्छेदेन प्र
तियोगिसामानाधिकरण्याभावात्। एवं सत्तावान् जातेरित्यत्र सत्तात्वावच्छिन्नाभावस्य कालिकतया नियत
विशिष्टसत्तात्वावच्छिन्नाभावस्य दैशिकतयापि हेतुसामानाधिकरणहेत्वधिकरणीभूतनित्यद्रव्यगु
णयोरवृत्तेः सविष्टपदमिति। अतएवोक्तं। कपिसंयोगादिति। केचित्तु व्यापकतायामभावस्येति ता
दृअभावीयस्वरूपसंबंधरूपेण विवक्षिता। सा च नैभावसाधारणी तथा च संयोगाभावसमानाधिकरण
ये घटात्यंताभावादय एव तत्प्रयोगितानवच्छेदकमेव कपिसंयोगाभावनिष्ठप्रतियोगित्वं कपिसंयोग
स्याभावीयसंसर्गेणाकपिसंयोगाभावासमानाधिकरणत्वात्। तथा च यथाश्रुत एव ग्रंथः साधुः न चै
वं घटत्वात्यंताभावस्यापि कपिसंयोगाभावप्रमेयत्वादिव्यापकतया तदभावे स्य घटत्वादेः स्ववि
शिष्टहेत्वधिकरणावच्छेदेन घटत्वाभावात्मकप्रतियोगिसामानाधिकरण्यादसंभव इति वाच्यं। घ
टत्वाभावप्रकारकप्रमाविशेष्यत्वाभावस्याभावप्रतियोगिकतथातिरिक्तस्य घटत्वसमनियततया।

घटत्वाभावादेरपि तत्प्रतियोगित्वेनैव व्यापकत्वाभावात् संयोगाभावप्रकारकप्रमाविषयत्वं च संयोगाभाववत्ता
व्याप्यवृत्तीति तदभावस्य न संयोगसमनैयत्यमिति संयोगाभावो न तत्प्रतियोगीति न तस्य व्यापकत्वं ध्व
तिरित्याहुः। ननु धूमाभावे जलत्ववृत्तित्वविशिष्टगोत्वाभावो नास्तीति धीः धूमाभावेनैव क्रियते अभावप्रतियो
गिकाभावाधिकरणकाभावातिरिक्ताभावानभ्युपगमात् तथा च धूमवान् वह्नेरित्यादावतिव्याप्तिः धूमा
भावस्य गोत्वाभावरूपप्रतियोगिसमानाधिकरण्यस्य स्वविशिष्टत्वधिकरणावच्छेदेन सत्त्वात् न च यावद्व्याप
कताघटकमध्यनिष्ठविसंयोगेनातथात्वात् अतिप्रसंगः धूमाभावे जलत्ववृत्तित्वविशिष्टगोत्वाभावसंयोग्यन्यतर
भास्तीति प्रतीतिबलात् संयोगिसामान्यस्यैव तत्प्रतियोग्यत्वेन तस्यापि संभवात्। एवमयोगोलकान्यत्वाभावाभाव
स्यापि उक्तक्रमेण गोत्वाभावादिरूपप्रतियोगिसामानाधिकरण्यमत आह जलादावपीति। यद्यपि धू
माभावस्वरूपत्वेऽप्येतदभावस्य जलादावेव तदभावत्वेन न वृत्तिः किंतु धूमाभावत्वेनैव यथा घटात्यन्ताभा
व पटो नास्तीति बुद्धेरनतिरिक्ताभावविषयत्वमते घटात्यन्ताभावस्यैव पटात्यन्ताभावत्वं तथा पटवति पटाभाव
तया न वृत्तिः किंतु घटात्यन्ताभावतयेति कथमतिप्रसंगः तथापि तावद्गुरुकल्पने गौरवादन्यत्र क्लृप्त
त्वाभावस्यैव तदभावत्वं कल्प्यते लाघवादिति भावः। ननु तथापि धूमवान् वह्नेरित्यत्रातिव्याप्तिः
धूमवद्वृत्तित्वविशिष्टगोत्वाभावसंयोग्यन्यतराभावस्य [struck-through] भिन्नतया है [illegible] व्यापकताघटक
तते संबंधेन स्वविशिष्टत्वाधिकरणावच्छेदेन यत्किंचित्प्रतियोगितासामानाधिकरण्यात् न च व्या
× २ धूमत्वेन प्रमेयसामान्याभावस्य धूमाभावाभिन्नतयायोगोलकान्यत्वेन प्रमेयसमा
न्याभावस्यायोगोलकान्यत्वाभावाभिन्नतया धूमवृत्तित्वेन प्रमेयसामान्याभावस्य धूमभेदाभिन्नत्वं २